

पुस्तकमिदं कार्तिकमाहात्म्यम्
पत्राणि ३८

कार्तिक०

श्रीगणेशायनमः श्रीमद्गुरवेनमः श्रियःपतिंसत्यभामागतेदेवर्षिसत्तमे मोदल्येनैवसमादतंस्वपतिंप्रियदर्शनं हर्षोत्फुल्लनयनास

१ त्याकृष्णमथाब्रवीत् १ धन्यास्मिकृतकृत्यास्मिसफलंजीवनंमम मज्जन्मनिनिदानौच धन्यौतौपितरौमम २ यौमां[…]

जनयामासतुर्ध्रुवं षोडशस्त्रीसहस्राणांवल्लभाहंयतस्तव ३ यस्मान्ममादिपुरुषः कल्पवृक्षसमन्वितः यथोक्तविधिना[…]कनारदे

नसमर्पितः ४ यद्वार्त्तामपिजानंतिमर्त्यसंस्थानजंतवः सोयंकल्पद्रुमोगेहेममतिष्ठतिसांप्रतं ५ त्रैलोक्याधिपतेस्त्वाहंप्रियापते

श्लो ५ रतिवल्लभा अतोहंप्रष्टुमिच्छामिकिंचित्त्वांमधुसूदन ६ यदित्वंमत्प्रियकरः कथयस्वात्मकारणं श्रुत्वातत्रपुनस्त्वाहंकरोमिहितमा

त्मनः ७ यथाकल्पंत्वयादेवियुक्तास्यांनकर्हिचित् सूतउवाच ८ इतिप्रियावचःश्रुत्वास्मेरास्यःयादवाग्रजः सत्याकरेकरंधृत्वागात्कल्प

स्ततरोस्तले ९ विसर्ज्यानुचरंलोकंसविलासप्रियान्वितः प्रहस्यसत्यभामांप्रोवाचजगतांपतिः १० तत्प्रीतिपरितोषार्थंलत

तुलितंताग्रजः श्रीकृष्णउवाच नमेत्वत्तःप्रियतमाकाचिद्देविनत्वांविना षोडशस्त्रीसहस्राणांप्रियेप्राणसमाह्यसि ११ त्वदर्थे

देवराजेनविरोधोदैवतैःसह त्वयायत्प्रार्थितंकांतेशृणुतच्चमहद्भवेत् अदेयमथवाकार्यमकथ्यमपियत्तुनः १२ तत्करोमिकथंप्र

स्तंकथयामितदाप्रिये नत्वच्छ्रवसर्वमिदंतेमर्त्यापतनमस्तिवर्त्तते १३ सत्योवाच दानंव्रतंतपोवापिकिंतुपूर्वंकृतंमया येनाहं

मर्त्यजामर्त्यभावातोह्यमर्त्याकिल १४ तवार्द्धांगहारेनित्यंगरुडोपरिगामिनी इंद्रादिदेवतावासमगमंचत्वयासह १५ अतस्त्वांप्रष्टुमि

च्छामिकृतंकिं[…]शुभं भवांतरेचकीदृशीलाकिंचाहंकस्यकन्यका १६ श्रीकृष्णउवाच शृणुष्वैकमनाकांतेयथात्वंपूर्वज

न्मनिपुण्य[…]त्वतीतत्सर्वंकथयामिते १७ आसीत्कृतयुगस्यांतेमायापुर्यांद्विजोत्तमः आत्रेयोदेवशर्मेतिवेदवेदांगपारगः १८

ऽप्रतिष्ठेयोऽग्निशुश्रूषासौरव्रतपरायणः सूर्यमाराधयामास साक्षात्सूर्य इवापरः १९ तस्यातिवयसस्त्वासीन्नाम्ना गुणवती सुता अ
पुत्रः स्वस्य शिष्याय चंद्रनाम्ने ददौ सुतां २० तमेव पुत्रवन्मेने स च तं पितृवद्वशी तौ कदाचिद्वनं जातौ कुशेध्माहरणार्थिनौ २१
हिमाद्रिपादज[illegible]रे तु स्थावितस्ततः तावतौ राक्षसं घोरं आयांतं संप्रपश्यतां २२ भयविह्वलसर्वांगौ ज्वरकंपौ पलायितुं निह
तौ स राक्षसा तेन कृतांतसमरूपिणा २३ तौ तत्क्षेत्रप्रभावेन धर्मशीलतया पुनः वैकुंठभवनं नीतौ मद्गणैर्मत्समीपगैः २४ यावज्ज म २
जीवं तु यत्ताभ्यां सूर्यपूजादिकं कृतं तेनाहं कर्मणा ताभ्यां सुप्रीतोह्यभवं किल २५ सौराः शैवाश्च गाणेशा वैष्णवाः शक्तिपूजकाः
मामेव प्राप्नुवंतीह वर्षापः सागरं यथा २६ एकोऽहं पंचधा जातः क्रीडया नामभिः किल देवदत्तो यथा कश्चित्पुत्रभ्रात्रादिनामभिः
२७ सर्वेषां देवतानां च नामैक्यं कीर्तितमपि श्रीकृष्ण उवाच ततस्तौ मद्वनादिवासिनौ विमानगामिनौ रविवर्चसावुभौ मत्स्वरू
पौ मत्सन्निधानगौ दिव्यांगनाचंदनभोगभोगिनौ २९ इति श्रीपद्मपुराणे उत्तरखंडे कृष्णसत्यासंवादे कार्त्तिकमाहात्म्ये प्रथ
मोऽध्यायः श्रीकृष्ण उवाच ततो गुणवती श्रुत्वा राक्षसेन हतावुभौ पतिपितृजदुःखार्ता करुणं प्रत्यवेदयत १ गुणवत्युवाच
हा नाथ हा पितस्सम्यक्का गच्छतः क्षमया विना वालाहं किं करोम्यद्य अनाथा भवता विना २ को नु मामाश्रितां गेहे भोजनाच्छादनादिकं
अर्थिकं चित्कुशलं स्नेहात्पालयेत्यपि दुःखितां ३ हतभाग्याहं हतसुखा हतेशा हतजीविता शरणं किं व्रजाम्यद्य [illegible]मे दुःखवृ
मार्जयेत ४ क्व गच्छामि क्व तिष्ठामि किं करोमि यथाध्रुवं विधात्राहं हतास्म्यद्य अनाथा वतबालिका ५ श्रीकृष्ण उवाच एवं बहु
विलप्यायकुररीव भृशातुरा पपात भूमौ विकला रंभावातहतेव सा ६ चिरात्संज्ञामवाप्यासा भूयो विलप्य करुणं बहु निम[illegible]दुःख[illegible]
दुःशोकार्त्ता स[illegible]र्तत ७ सा गृहोपस्करान्सर्वान्विक्रीयाप्यशुभकर्मकृत तयोश्चक्रे यथाशक्ति पारलौकिकं ततः क्रियां ८

कार्तिक० तस्मिन्नेव पुरे वा[...]वैश्रे प्रभृति जीवनं विष्णुभक्तिरतासीत् तासत्यशोचादितत्परा ९ वृत्तद्वयं त्वयासम्यक् आजन्ममरणात् कृतं ए
कादशीव्रतं सम्यक् कार्तिकस्य च सेवनं १० एतद्व्रतद्वयं कांते ममातीव प्रियंकरं भुक्तिमुक्तिकरं पुण्यं पुत्रसंपत्ति[...]कं ११ का
२. र्तिके मासि ये नित्यं तुलासंस्थे दिवाकरे प्रातःस्नायंति ते मुक्ता महापातकिनोपि च १२ स्नानं जागरणं दीपं तुलसीवन[पा]लनं का
र्तिके ये प्रकुर्वंति ते नरा विष्णुमूर्तयः १३ संमार्जनं गृहे विष्णोः स्वस्तिकादिनिवेदनं विष्णोः पूजां च ये कुर्युर्जीवन्मुक्तास्तु ते
नराः १४ इत्थं दिनत्रयमपि कार्तिके ये प्रकुर्वते देवानामपि वंद्यास्ते किं यैराजन्म तत्कृतं १५ इत्थं गुणावली सम्यक् व्रतद्व
व्रतिनोऽस्वभूत नित्यं विष्णोः परिकरे भक्त्या तत्परमानसा: १६ कदाचिज्ज्वरमासाद्य कृशांगी ज्वरपीडिता स्नातुं गंगां गता का
ते कथंचिच्छनकैस्तदा १७ यावज्जलांतरगता कंपंती सीतपीडिता तावत्सा विह्वला पश्यद्विमानं जातमंबरात् १८ शंखचक्र
गदापद्महस्तैरासीनमंबरात् विष्णुरूपधरैः सम्यग्वैनतेयध्वजांकितं १९ आरोहमद्विमानं तदप्सरोगणसेवितं चामरैर्वी
ज्यमानं तत्र वैकुंठगमनायनगणा: २० अपसात द्विमानस्था ज्वलदग्निशिखोपमा कार्तिकव्रतपुण्येन मत्समीप्यगताभवत्
२१ अथ ब्रह्मादिदेवानां यथाप्रार्थनया सह वं आगतोऽहं गणा: सर्वे जातास्ते पिमयासह २२ एते हि यादवा: सर्वे मद्गणा एवभा
मिनि सर्वदा चिंतयि यादेविमत्तुल्यगुणशालिन: २३ पिता ते देवशर्माभूत् सत्राजिदभिधो ह्ययं यश्चंद्रशर्मा सोऽक्रूर: स्वं सा गुण
वतीशुभे २४ [...]तिकव्रतपुण्येन मम प्रीतिवर्द्धिनी मद्वारि पत्लवाप्यवं तुलसीवाटिका कृता २५ कार्तिके दीपदानं च य
त्वया वै कृतपुरा त्वद्देहगेहसंस्थेयं तस्माल्लक्ष्मीः स्थिराभवत् २६ यच्च व्रतादिकं सर्वं विष्णवे भर्तृरूपिणे निवेदितवतीत
स्मात् मम भार्यत्वमागता २७ आजन्ममरणात्पूर्वं यत्कार्तिकव्रतं कृतं कदाचिदपि तेन त्वं मद्वियोगं न यास्यसि २८ एवं ये कार्ति ५२

के मासि नरा व्रतपरायणाः मत्सान्निध्यगतास्तेपि प्रीतिदा लं यथा मम २९ यत्सदानव्रततपः कारिणो मानवा खलु कार्ति
कव्रतपुण्यस्य नार्हंति कलामपि ३० सूत उवाच इत्थं निशम्य भुवनाधिपतेरिदानीं प्राग्जन्मपुण्यविभवैर्भवजातलक्ष्मी विस्मेय
रं त्रिभुवनेशमनेकरूपं कृष्णं प्रणम्य वचनं निजगाद सत्या ३१ इति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमाहात्म्ये कृष्णसत्यासंवा
दे द्वितीयोऽध्यायः सत्योवाच सर्वेपि कालावयवास्तव कालस्वरूपिणः मासानां तु कथं नाथ संमासः कार्तिको वरः १ एका
दशीतिथीनां च मासानां कार्तिकः प्रियः कथं ते देववेदेश कारणं किंनु कथ्यतां २ श्रीकृष्ण उवाच साधु पृष्टं त्वया सत्ये शृणुष्वैकाग्रमा
नसा पृथोर्वैन्यस्य संवादं देवर्षेर्नारदस्य च ३ एवमेव पुरा पृष्टो नारदः पृथुना प्रिये उवाच कार्तिकाधिक्यं कारणं सर्ववित्मु
निः ४ नारद उवाच शंखनामाभवत्पूर्वं असुरः सागरात्मजः त्रिलोकीमथने सक्तो महाबलपराक्रमः ५ जित्वा देवान्निरा
कृत्य सुरलोकान्महासुरः इंद्रादिलोकपालानाम् अधिकारानथाहरत् ६ तद्भयाद्देवाः सुवर्णाद्रिगुहां गताः न्यवस
न्बहुवर्षाणां सावरोधाः सबांधवाः ७ सुवर्णाद्रिगुहादुर्गसंस्थितास्त्रिदशा यदा तदस्मानोवभूवुस्ते तदा दैत्यो विचारयत् ८
हृताधिकारास्त्रिदशा मया यद्यपि निर्जिताः बलेन खलु युक्तास्ते करणीयं मया त्र किं ९ श्रुतास्तेन तु मया देवा वेदमंत्रबलान्वि
ताः तानहं हरिष्ये ततः सर्वे बलहीना भवंति हि १० नारद उवाच इति मत्वा ततो दैत्यो विष्णुमालक्ष्य निद्रितं सत्यलोकाद्ब्रह्मणस्तु
वेदान्नाहरसर्वान् ११ नीतास्तु तेन ते वेदा तद्भयात्ते निराकृताः तोयानि विविशुस्तत्र यज्ञमंत्रसमन्विताः १२ तान्मार्गे तु सं

कार्तिक सोपि समुद्रांतर्गतो भवत् न ददर्श ततो दैत्यः क्वचिद्वेदान्समास्थितान् १३ अथ ब्रह्मा सुरैः सार्द्धं शरण्यं विष्णुमव्ययम् पूजोपक
रणान्नगृहीत्वा वैकुंठभवनं गताः १४ तत्र तस्य प्रबोधाय गीतवाद्यादिकाः क्रिया चक्रुर्देवा गंधपुष्पैः धूपदीपाक्षतैर्मुहुः १५
३ अथ प्रबुद्धो भगवान् तद्भक्तिपरितोषितः ददर्श तैः सुरैस्तत्र सहस्रार्कसमद्युतिः १६ उपचारैः षोडशभिः संपूज्य त्रिदशा
स्तथा दंडवत्पतितास्ते भीतान्वाचाप्यमाधवः १७ श्रीभगवानुवाच वरदोहं सुरगणा गीतवाद्यादिमंगलैः मनोभिल
षितान्कामान्सर्वानेव ददामि वः १८ ईदृश्यस्मिन्नके कार्तिक्यां याचैंदुकोधनी भवेत् निशि तु ये रतास्ते या यां गीतवाद्यादिमंगला
न् १९ ये कुर्वंति नरा नित्यं मत्समीपं व्रजंति ते पायोनाचमनाद्येषु भवद्भिश्च यथा कृतं २० तदा प्रभृति गुणं मस्मान्क्रीडावंतः सुखकार
णं वेदाः शंखेन हृताः सर्वे तिष्ठंतु उदके स्थिताः २१ नानात्पपाम्यहं देवा हत्वा सागरनंदनं अद्यप्रभृत्यवेदास्तु मंत्रबीजमला
न्विता २२ प्रत्यब्दं कार्तिके मासि विप्रमेव स्थलं सर्वदा मत्स्यस्यापि च मध्ये वा अपि जलमध्यगाः २३ भवंतोपि मया सार्द्धं मायांतु च
मुनीश्वराः कालेस्मिन्ये प्रकुर्वंति प्रातःस्नानं नरोत्तमाः २४ ते सर्वे यज्ञावभृथैः सुस्नाताः स्युर्न संशयः ये कार्तिकव्रतं सम्यक्कु
र्वंति मनुजाः सदा २५ ते देहांते त्वया प्राप्य मद्भवनं सदा विघ्नोभ्यादरत्नां तेषां यथा कार्यं मया तथा २६ तेषां त्वया च वरुणः
पुत्रपौत्रादिसंतति धनवृद्धि यथा स्यात्तथा कार्यं मया तथा २७ मम स्वरूपधारासा दोजीवन्मुक्ताश्च ते नराः आजन्ममरणा
यैस्तु कृतं तेन तत्कृतं ततमं २८ यथोक्तविधिना सम्यकु तेमम्मान्याभवंत्यपि तकारस्यायतस्याहं भवद्भिः प्रतिबोधितः २९ व्रता

ष्टैवाभिमान्प्राप्ता अतीवप्रीतिदा मम ३० एतद्व्रतपराभिः तु पथ्यानैः कृतं सानिध्यमावहतमेन तथान्यत्र हि दानानि तीर्थानि तपांसि यज्ञाः
स्वर्लोकदान्येव सदा सुरोत्तमाः ३१ इति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमाहात्म्ये नवमोऽध्यायः नारद उवाच इत्युक्त्वा भगवान्विष्णुः श
फरीतुल्यरूपधृक् स्वं पपात जले विंध्यवासिनः काश्यपस्य तु १ स तं कमंडलोर्मध्ये स्वकृपया क्षिप्तवान्मुनिः तावंतं न ममौ तत्र ततः कूपनि
वेशयत् २ तत्रापि न ममौ तावत्काशारं प्रापयत्ततं एवं स सागरे क्षिप्तः तत्रैसोऽपि विवर्द्धत ३ ततो बध्वा तं शंखं विष्णुमत्स्यस्वरूपधृक्
अपतत्स्वकरेभ्यस्तावद्दीवनमाविशत् ४ तत्राहूय च ऋषीन्सर्वान् इदमाख्यापयत्प्रभुः श्रीकृष्ण उवाच जलांतरविसर्पिणीं तु यूयं वेदान्प्र
मार्गतः ६ आनयध्वं वेलारितां सरहस्याजलांतरात् तावत्प्रयागे तिष्ठामि देवतागणसंवृतः ७ नारद उवाच ततस्तैः सर्वमुनिभिः तेजोब
लसमन्वितैः उद्धारितास्सबीजास्ते वेदा यज्ञसमन्विताः ८ ते पुनः यावन्मितं यस्य लब्धं तावद्धि तस्य तत् स एव ऋषिस्तस्य तदाप्रभृति पार्थि
व ९ अथ सर्वेऽपि संगम्य प्रयागं मुनयो ययुः विष्णवे सविधात्रे ते लब्धान्साम्नान्न्यवेदयन् १० लब्ध्वा वेदान्सयज्ञांस्ते ब्रह्मा हर्षसमन्वितः॥
अयजद्वाजिमेधेन देवर्षिगणसंवृतः ११ यज्ञांते देवगंधर्वा यक्षाः किंनरगुह्यकाः निपत्य दंडवद्भूमौ विज्ञप्तिं चक्रुरादृताः १२ देवा ऊचुः
देवदेवजगन्नाथ विज्ञप्तिं शृणु नः प्रभो हर्षकालोऽयमस्माकं तस्माद्वरदो भव १३ स्थानेऽस्मिन्द्रुहिणो वेदान्नष्टान्वै प्रापयत्स्वयं य
ज्ञभागान्वयं प्राप्तास्त्वत्प्रसादादुमापते १४ स्थानमेतदतिश्रेष्ठं पृथिव्यां पुण्यवर्द्धनः भुक्तिमुक्तिप्रदं चास्तु प्रसादाद्भवतः सदा १५ कालोऽ
प्ययं महापुण्यो ब्रह्मादिविशुद्धिकृत् दत्वा त्वयकरम्यात्तु वरमेनं ददस्व नः १६ विष्णुरुवाच ममाप्येतन्मतं देवा यद्व ... दाहृतं तथास्तु

कार्तिक० लभते त्वनुक्रमात्सौख्यमितिप्रथां १६ सूर्यवंशोद्भवो राजा गंगामन्नानयिष्यति सस्तूर्यकंन्यमालांई कालिंद्यां वै समेष्यति १८ पूर्वं तु सर्वव्र
९ लोद्यानि वसंतु मम पार्श्व तीर्थराजो ति विख्यातं तीर्थमेतद्भविष्यति १९ दानव्रततपोहोमं जपपूजादिकक्रिया अनंतफलदाः संतु मत्स्नाति
ष्यकारा सदा २० ब्रह्महत्यादिपापानि सप्तजन्मार्जितान्यपि दर्शनादस्य तीर्थस्य विनाशं यांति तत्क्षणात् २१ देहत्यागं ये नराः कुर्वंति मम
सन्निधौ मत्तनुं प्रविशंत्येव न पुनर्जन्मिनो नराः २२ पितृनुद्दिश्य ये श्राद्धं कुर्वंत्यत्र समागताः तेषां पितृगणाः सर्वे यांति तेमत्स लोकतां २३
कालोप्येव महापुण्यः फाल्गुनस्तु सदा नृणां सूर्ये मकरगे प्रातः स्नायिनां पापनाशनं २४ मकरस्थे रवौ माघे प्रातः स्नानं प्रकुर्वतां दर्श
नादेव पापानि यांति सूर्यादिवा तमः २५ सलोकत्वं समीपत्वं सरूपत्वं त्रिभिः क्रमात् नृणां ददामि तु स्नानै माघे मकरगे रवौ २६ दपमु
नीश्वराः सर्वे शृणुध्वं वचनं मम बदरीवनमध्ये हं सदा तिष्ठामि सर्वगः २७ अन्यत्र दशभिर्वर्षैस्तपसा प्राप्यते फलं तत्राहोरवमेकेन म
द्भिः प्राप्यते सदा २८ स्थानस्य दर्शनं तस्य ये कुर्वंति नरोत्तमाः जीवन्मुक्ताः सदा तेषु पापं नैवावतिष्ठति २९ नारद उवाच देवाः सर्वेप्यसकैं
सत्रितिस्थन्न तस्थानं प्रापुरिंद्रादयस्ते स्वीयं स्वीयं राज्यमागम्य सुरे ते गावंतस्ते विस्मयमेकं सुवंतः ३० सूत उवाच इमां कथां यः शृणुयान्नरोत्तमः
श्रावयेद्वापि विशुद्धचेताः स तीर्थराजे बदरीवनेथ स्नात्वा फलं तत्समवाप्नुयाच्च ३१ इति श्रीपद्मपुराणे कार्तिकमहात्म्ये चतुर्थोऽध्यायः ४ ऋषयऊ
वाच महाफलं त्वया विप्र मुने कार्तिकमाघयोः तयोः स्नानविधिं सम्यक् नियमान्वदिनारद १ उद्यापनविधिं चैव यथावद्वक्तुमर्हसि नारद
उवाच त्वं विस्तारं शृण्वंतां नानास्नानं विधेतत्र तत्पापवदंतु सम्यक् माहात्म्यं शृणु चैनृप आश्विनस्य तु मासस्य शुक्ले एकादशी भवेत् का

तिषस्यवृत्तेनेमंतस्यांकुर्यादतंद्रितः ३ रात्र्यांतुर्य्यांशयोर्वायांसमुत्तिष्ठेत्तत्पदावृत्ती नैऋत्यांप्रव्रजेद्ग्रामाद्बहिःसोदकभाजनः ४ दिवासं
ध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः अंतर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा ६ गृहीतशिश्नश्चोत्थायमृदाभ्युद्धृतैर्जलैः गंधले
पक्षयकरंशौचंकुर्यादतंद्रितः ७ वाचंनियम्ययत्नेनष्ठीवनोच्छ्वासवर्जितं कुर्यान्मूत्रपुरीषेतुरात्रौचदक्षिणामुखः ८ एकालिंगेगुदे
तिस्रःदशवामकरेतथा उभयोःसप्तदातव्यामृदःशुद्धिमभीप्सता ९ एकालिंगेकरेतिस्रउभयोर्मृद्द्वयंस्मृतं एतद्द्वित्रिगुणंतेषांब्रह्मचा
रिवनस्थयोः १० यतेश्चतुर्गुणंरात्रौतदर्धंशौचमाचरेत् तदर्धमपिमार्गस्थस्त्रीशूद्राणांतदर्धकं ११ शौचकर्मविहीनस्यसक
लानिष्फलाःक्रियाः मुखशुद्धिविहीनस्यनमंत्राःफलदायकाः १२ दंतजिह्वाविशुद्धिंचततःकुर्यात्प्रयत्नतः आयुर्बलंयशोवर्चःप्र
जाःपशुवसूनिच १३ ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते [illegible] १४ प्रतिपच्चतथानवमीषष्ठी
ष्वर्कदिनेतथा चंद्रसूर्योपरागेचनकुर्याद्दंतधावनं १५ कंटकीचूतकर्पासनिर्गुंडीब्रह्मवृक्षकान् वैरंडाविगंधाद्यैर्वर्जयेद्दंतधा
वनं १६ ततोविष्णुशिवस्यापिगृहंगच्छेत्प्रसन्नधीः गंधपुष्पार्घ्यतांबुलान्गृहीत्वाभक्तितत्परः १७ तत्रदेवस्यपाद्यादीनुपचा
रानपंचकूपपक कृत्वास्तुत्वापुनर्नत्वाकुर्याद्गीतादिमंगलं १८ तालवेणुमृदंगादिध्वनियुक्तंचकीर्तनं पुष्पैःधूपैःसतांबूलैर्गा
यकान्पिद्वे[illegible] १९ देवालयेगायनकालेनयाविश्ममृत्तपः तपांसियज्ञदानानिकृतानिद्विजगद्गुरोः २० तुष्टिदानंकेलौपस्मा

कार्तिक० उक्तिपु[illegible]ष्टेन कृत्वं वसामि रे वेशम यावद्वृत्तु पार्थिवः २१ विष्णुरेव तदा प्राह मद्भक्त्या परितोषितः नाहं वसामि वैकुंठे योगि
५ नां हृदये न हि २२ मद्भक्ता यत्र गायंते तत्र तिष्ठामि नारद तेषां पुष्पादिकं गंधधूपादि क्रीयते नरैः २३ तेन प्रीतिं परां याति न तथा मम त्र
पूजनात् मत्पुराणकथां श्रुत्वा मद्भक्तानां च गायनं २४ अर्कबीजैः कलौ कार्यं विष्णुर्नार्च्यस्तथाक्षतैः जपाकुंदशिरीषैश्च यूथिका
मालतीभवेत् २५ केतकीभवपुष्पैश्च नैवार्च्यः शंकरः सदा गणेशं तुलसीपत्रैः दुर्गां चैव न दूर्वया २६ मुनिपुष्पैस्तथा सर्वैर्लक्ष्मी
कामान् चेर्चयेत् एभ्योऽन्यानि प्रशस्तानि पूजार्थं सर्वदेवतु २७ एवं पूजाविधिं कृत्वा देवदेवं क्षमापयेत् मंत्रहीनं क्रियाहीनं भक्तिही
नं सुरेश्वर २८ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ततः प्रदक्षिणां कृत्वा दंडवत्प्रणिपत्य च २९ पुनर्क्षमाप्य देवेशं [illegible]पनाद्यं समाप
येत् नारद उवाच विष्णोः शिवस्यापि च पूजनं ये कुर्वंति समाकुला निशि कार्तिकस्य निर्धूतपापाः सह पूर्वजैस्ते प्रयांति विष्णोर्भवनं मनुष्याः
३१ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये पूजाजागरणं नाम पंचमोऽध्यायः ५ नारद उवाच नाडीद्वयावशिष्टायां रात्र्यां गच्छेज्जला
शयं तिलदर्भाक्षतैः पुष्पैर्गंधाद्यैः सहितः शुचिः १ मानुष्ये देवखाते वा नदीनां मध्यसंगमे क्रमाद्दशगुणं स्नाने तीर्थेऽनंतफलं स्मृतं २
विष्णुं स्मृत्वा तथा कुर्यात्संकल्पं स्नपनस्य तु तीर्थादिदेवताभ्यश्च क्रमादर्घ्यादि दापयेत् ३ नमः कमलनाभाय नमस्ते जलशायिने नमस्ते
तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते ४ वैकुंठे च प्रयागे च तथा बदरिकाश्रमे यतो विष्णुर्विचक्रमे त्रिधा संनिदधे पदं अतो देवाश्च यस

प

अपत्नीविष्णुविचक्रमे तैर्देवैः सहितः सर्वैः मुनिवेदमखान्वितैः ६ कार्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन प्रीत्यर्थं तव देवेश दामोदर म
यासह ७ ध्यात्वाहं त्वां च देवेश जलेऽस्मिन्स्नातुमुद्यतः तव प्रसादात्पापं मे दामोदर विनश्यतु ८ नित्ये नैमित्तिके कृष्ण कार्तिके पाप
नाशने गृहाणार्घ्यं मया दत्तं राधया सहितो हरिः ९ स्नात्वा भागीरथ्यां विष्णुं शिवं सूर्यं जले विशेत् नाभिमात्रे जले तिष्ठेद्व्रती स्ना
याद्यथाविधिः १० तिलामलककल्केन गृही स्नानं समाचरेत् वनस्थानां यतीनां च तुलसीमूलमृत्तिका ११ सप्तमी दर्शनवमी द्वितीया
दशमीषु च त्रयोदश्यां न स्नायात् धात्रीफलतिलैः सदा १२ आदौ कुर्यान्मलस्नानं मंत्रस्नानमतः परं स्त्रीशूद्राणां न वेदोक्तैर्मंत्रैः स्ना
प नं पुराणजैः १३ त्रिधाम्ने देवकार्यार्थं सपुराभक्तिभावनः स विष्णुः सर्वपापघ्नः पुनातु कृपयार्त्तिमां १४ विष्णोराज्ञामनुप्राप्य कार्ति
कव्रतकारणात् रक्षंतु देवास्ते सर्वे मां पुनंतु सवासवाः १५ वेदमंत्राः सबीजाश्च सरहस्याः सयज्ञकाः कश्यपाद्याश्च मुनयो मां पुनंतु स
गंगाद्याः देवते १६ सरितः सर्वाः तीर्थानि जलदा नदाः सप्तसागराः सर्वे मां पुनंतु जलाशयाः १७ पतिव्रतास्तु दित्याद्याः यक्षाः सिद्धाः सप
न्नगाः ओषध्यः पर्वताश्चापि मां पुनंतु त्रिलोकजाः १८ एभिः कृत्वा व्रती मंत्रैर्हितान्सपवित्रकाः देवर्षिमानवपितॄंस्तर्पयेच्च
यथाविधिः १९ यावंतः कार्तिके मासि वर्तंते पितृतर्पणे तिलास्तत्संख्यमब्दानि पितरः स्वर्गवासिनः २० ततो जलाद्विनिःक्रम्य
शुचिर्वस्त्रावृतो व्रती प्रातःकालोदितं कर्म समाप्यार्चयेद्धरिं पुनः २१ तीर्थानि देवान्संस्मृत्य पुनरर्घ्यान्प्रदापयेत् गंधपुष्पफ
लैर्युक्तो [illegible]ति[illegible]स्थमानसः २२ व्रतिनः कार्तिके मासि स्नातस्य विधिवत्सदा गृहाणार्घ्यं मया दत्तं दनुजेंद्रनिषूदन २३ तत

कार्तिक ब्राह्मणान्समभ्यर्च्य भोजयेद्वेदपारगान् गंधैः पुष्पैः सतांबूलैः प्रणमेच्च पुनः पुनः २४ तीर्थानि दक्षिणे पादे वेदास्तु मुखसंस्थिताः

६ सर्वांगेषु स्थिता देवाः पूजितास्तेन तद्दर्चनात् २५ अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणो भुवि नावमान्या नो विरोध्याः कदाचिच्छु

भमिच्छता २६ तां चैव हरिप्रियां देवीं तुलसीमर्चयेद्व्रती प्रदक्षिणानमस्कारैः कुर्यादेकाग्रमानसः २७ देवैस्त्वं निर्मिता पूर्वमर्चि

तासि मुनीश्वरैः नमो नमस्ते तुलसि पापं हर हरिप्रिये २८ ततो विष्णुकथां श्रुत्वा पौराणीं स्निग्धमानसः ब्राह्मणं तं मुनिं

विप्रं पूजयेद्भक्तिमान्व्रती २९ एवं सर्वविधिं सम्यक्कुर्यात्कं भक्तिमान्नरः करोति यः स लभते नारायणसलोकतां ३० ए

णपदं पापविनाशकं त्यं बुद्धिप्रदं स्वर्गमनादिसाधकं मुक्तेर्निदानं नहि कार्तिकव्रतात् विष्णुप्रियादन्यदिहास्ति भूतले ३१ इ

ति श्रीपा० उ० कार्ति० कृष्णसत्य० संवादे षष्ठोऽध्यायः ६ नारद उवाच कार्तिकव्रतिनां पुंसां नियमा ये प्रकीर्तिताः तान्प्रशृणुष्व महारा जन

न कथ्यमानान्समासतः १ सर्वामिषाणि मांसानि क्षौद्रं सौवीरकं तथा राजमाषादिकं चापि नैवाद्यात्कार्तिकव्रती २ परान्नं च परद्रो

पुष्पमः हं परदारागमं तथा तीर्थं विना प्रवासं च वर्जयेत्कार्तिकव्रती ३ द्विदलं तिलतैलं च तथान्नं तिलदूषितं भावदुष्टं शब्ददुष्टं वर्जये

हि वर्जनो त्कार्तिकव्रती ४ देवदेव[illegible]नां वगुरूणां व्रतिनां तथा स्त्रियाश्च राजमहतां निंदां वर्जयेत्कार्तिकव्रती ५ प्राण्यंगमामिषं चूर्णं

फले जंबीरमामिषं धान्ये मसूरिका प्रोक्ता ह्यन्नं पर्युषितं तथा ६ गोछागीमहिषीदुग्धादन्यदुग्धादि चामिषं द्विजक्रीताः

रसाः सर्वे लवणं भूमिजं तथा ७ ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं आत्मार्थे पाचितं चान्नं आमिषं तत्स्मृतं बुधैः ८

ब्रह्मचारी अधःसुप्तिः पत्रावल्यां तु भोजनं चतुर्थकाले भुंजीत कुर्यादेतत्सदा व्रती ९ ४ १

नरकस्य चतुर्दश्यां तैलाभ्यंगं तु कारयेत् अन्यत्र कार्तिकस्नायी तैलाभ्यंगं न कारयेत् १० रजस्वलांत्यजम्लेच्छपतितव्रात्यकैः सह द्विजद्विट्वेदवाह्यै
श्च न वदेत्सर्वदा व्रती ११ एभिर्दृष्टं च काकैश्च सूतकान्नं च वर्जयेत् द्विःपाचितं च दग्धान्नं नैवाद्याद्वैष्णवो व्रती १२ एतानि वर्जयेन्नित्यं व्रती सर्वत्र
कार्तिके कृ[illegible]च्छ्रार्घं चापि कुर्वीत स्वशक्त्या विष्णुप्रीतये १३ कूष्मांडं बृहती चैव ताकं मूलकं तथा श्रीफलं च कलिंगं च फलं धात्रीफ
लं तथा १४ नारिकेलमलाबुं च पटोलीं बदरीफलं चर्मवृंताकं वल्लीं च शाकं तुलसिजं तथा १५ शाकान्येतानि वर्ज्यानि क्रमात्प्र
तिपदादिषु धात्रीफलं रवौ तद्वद्वर्जयेत्सर्वदा गृही १६ एभ्योन्यद्वर्जयेत्किंचित्तद्विष्णुप्रीतये नरैः तत्पुनर्ब्राह्मणे दत्त्वा भुंजीत सर्वदै त४
व हि १७ एवमेव च माघे तु स कुर्यान्नियमान्व्रती हरेर्जागरणं तत्र प्रबोधिन्यां तु कारयेत् १८ यथोक्तकारिणं दृष्ट्वा कार्तिकव्र
तिनं नरं यमदूताः पलायंते सिंहं दृष्ट्वा गजा यथा १९ एवं विष्णुव्रतं ह्येतन्नयज्ञशतयाजकं यत्कृत्वा प्राप्नुयात्स्वर्गं वैकुंठं कार्तिकव्रती
२० भुक्तिमुक्तिप्रदानीह यानि तीर्थानि भूतले वसंति तानि तद्देहे कार्तिकव्रतकारिणः २१ दुःस्वप्नं दुःकृतं किंचित्कमनोवाक्कायकर्म
जं कार्तिकव्रतिनं दृष्ट्वा विलयं यांति तत्क्षणात् २२ कार्तिकव्रतिनः पुंसो विष्णुवाक्यप्रणोदिताः रक्षां कुर्वंति शक्राद्याः राजानं किं
करा यथा २३ विष्णुव्रतकरो नित्यं यत्र तिष्ठति पूजितः ग्रहभूतपिशाचाद्या नैव तिष्ठंति तत्र वै २४ कार्तिकव्रतिनः पुण्यं यथोक्तव्र
तकारिणः न समर्थो भवेद्वक्तुं ब्र[illegible]पाह चतुर्मुखः २५ विष्णुप्रियं सकलकल्मषनाशनं संपुत्र[illegible]धनधान्यसमृद्धिकारि
ऊर्जव्रतं [illegible]विधिना कुरुते मनुष्यः किं तस्य तीर्थपरिशीलनसेवया च २६ इति श्रीपद्मपुराणे कृष्णसत्यासंवादे ऊर्जनियमनामसप्त

स्रा २ च २

कार्तिक० मोऽध्यायः ७ नारदउवाच अथोर्जव्रतिनःसम्यकुद्यापनविधिंनृप तच्छृणुष्वमयाख्यातंसविधानंसमासतः १ ऊर्जशुक्ल
१ चतुर्दश्यांकुर्यादुद्यापनंव्रती व्रतसंपूर्तिहेत्वर्थंविष्णुप्रीत्यर्थमेवच २ तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभां सतोरणांचतुर्द्वारां
पुष्पचामरशोभितां ३ द्वारेषुद्वारपालांश्चपूजयेन्मृन्मयान्पृथक् पुण्यशीलंसुशीलंचजयंविजयमेवच ४ तुलसीमूलदेशे
तुसर्वतोभद्रमुत्तमं चतुर्भिर्वर्णकैःसम्यक्कुर्याच्छोभाढ्यंसुमनोहरं ५ तस्योपरिन्यसेत्कलशंपंचरत्नसमन्वितं महाफलेनसंयुक्तं
कुंभंतत्रनिधापयेच ६ पूजयेत्तत्रदेवेशंशंखचक्रगदाधरं कौशेयपीतवसनंयुक्तंजलधिकन्यया ७ इंद्रादिलोकपालांश्चपू
३ जयेन्मंडलेव्रती द्वादश्यांप्रतिबुद्धोसौत्रयोदश्यांततःसुरैः ८ दृश्योर्चितश्चतुर्दश्यांतस्मात्सपूज्यस्तिथाविह तस्मादुपवसेद्भक्त्यातस्यां
ततःप्रयतमानसः ९ पूजयेद्देवदेवेशंसौवर्णींगुर्वनुज्ञया उपचारैःषोडशभिर्नानाभक्ष्यसमन्वितैः १० रात्रौजागरणंकुर्याद्गीतवा
द्यादिमंगलैः कुर्वंतिगीतंमनुजाजागरेचक्रपाणिनः ११ जन्मांतरशतोद्भूतैर्मुक्तास्तेपापसंचयैः नरास्तेजागरेविष्णोर्गीतंवाद्यं
प्रकुर्वते १२ गोसहस्रंप्रदत्तेनसमंफलमुदाहृतं गीतनृत्यादिकंकुर्वन्दर्शयन्कौतुकानिच १३ पुरतोवासुदेवस्यरात्रौचहरिजा
गरेपठन्विष्णुचरित्राणितोषयंजयतिवैष्णवान् १४ हस्तेनकुरुतेवाद्यंखेदपापांचैवकारयेत्तु भावैस्तैस्तोषयन्यस्तुकुरुतेहरिजागरं १५
दिनेदिनेतस्यपुण्यंप्रतीर्थकोटिसमंस्मृतं ततस्तुपौर्णमास्यांचसपत्नीकान्द्विजोत्तमान् १६ त्रिंशन्मितान्तथैकंवास्वशक्त्यावा
निमंत्रयेत् वरान्दद्यात्स्वयंविष्णुमतस्यरूपामेवततः १७ अस्यांजप्तंचदत्तंचतदनंतफलंस्मृतं अतस्तान्भोजयेद्विप्रान्स्वापसान्नादिना

व्रती १८ ग्रहीतो देवा इति द्वाभ्यां जुहुयात्तिलपायसं प्रीत्यर्थं देवदेवस्य देवानां च पृथक् पृथक् १९ दक्षिणां च यथाशक्त्या प्रेरयात्प्रलो
भवर्जितान् पुनर्देवं समभ्यर्च्य देवांश्च तुलसीं तथा २० ततो गां कपिलां तत्र पूजयेद्विधिवत् व्रती गुरुं सव्रतापेक्षां वस्त्रालंकरणादि ले
भिः २१ सपत्नीकांस्तु सम्यर्च्य तांश्च विप्रान् क्षमापयेत् युष्मत्प्रसादाद्देवेशः प्रसन्नोस्तु सदा मम २२ व्रतादस्माच्च यत्पापं सप्तजन्म त्या
कृतं मया तत्सर्वं नाशमायातु स्थिरा त्वाचास्तु संततिः २३ मनोरथाश्च सफलाः संतु नित्यं ममाच्युतात् देहांते वैष्णवं स्थानं प्राप्नुयाम
तिदुर्लभं २४ इति क्षमाप्य तान्विप्रान्प्रसाद्य च विसर्जयेत् तां मूर्तिं गुरवे दद्यात् उपस्करं सहा व्रती २५ ततः सुहृद्बंधुयुतः स्वयं
भुंजीत भक्तिमान् कार्तिके चापि तपसि विधिरेवंविधः स्मृतः २६ नारद उवाच एवं यः कुरुते सम्यक् कार्तिकस्य व्रतं नरः नि
ष्पापः सर्वपापेभ्यो विष्णुसान्निध्यमाप्नुयात् २७ सर्वव्रतैः सर्वतीर्थैः सर्वदानैश्च यत्फलं तत्फलं कोटिगुणितं सम्यगस्य विधान
तः २८ ते धन्यास्ते सदा पूज्यास्तेषां च सफलो भवः विष्णुभक्तिपरा ये स्युः कार्तिकव्रतकारिणः २९ देहस्थितानि पापानि नाश
मायांति तत्क्षणात् कथ्यास्यामो वदंत्येवं यदयं व्रतकारिणः ३० इत्यूर्जव्रतनियमान् शृणोति भक्त्या यो वैतत्कथयति वैष्णवाग्रतो
पि यः सम्यग्व्रतकारणात्फलं लभेतां द्वावेतौ कलुषविनाशनं लभंते ३१ इति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमाहात्म्ये उद्या
पनविधिर्नामाऽध्यायः ॥ पृथुरुवाच त्वया यत्कथितं ब्रह्मन् व्रतस्यास्य विस्तरात् यत्त्वया तुलसीमूले पूजा विष्णोस्त्वयोदिता
१ तेनाहं प्रष्टुमिच्छामि माहात्म्यं तुलसीभवं कथं सातिप्रिया विष्णोर्देवदेवस्य शार्ङ्गिणः २ कथं वा समुत्पन्ना कस्मिन्स्थाने च नारद

तांचबुद्धिक्रमात्सेनसर्वतोऽपियतोमम ३ नारदउवाच श्रणुराजन्नवहितोमाहात्म्यंतुलशीभवं सेतिहासंपुरावृत्तंतत्सर्वंकथयामिते ४
पुराशक्रःशिवंद्रष्टुमगात्कैलाशपर्वतं सहदेवैःपरिवृत्तस्त्वप्सरोगणसेवितः ५ यावद्गतःशिवंगेहेतावत्तत्रसदृष्टवान् पुरुषंभीमक
र्माणंदंष्ट्रानयनभास्वरं ६ सपप्रच्छतेनकस्त्वंभोक्वगतोजगदीश्वरः एवंपुनःपुनःपृष्टःयदानोचितवान्नृप ७ ततःक्रुद्धोवज्रपा
णिस्तंनिर्भर्त्स्यवचोऽब्रवीत् ८ शक्रउवाच रेमयापृष्टमानोसिनोत्तरंदत्तवानसि अतस्त्वांहन्मिवज्रेणकस्तेत्रातास्तिदुर्मते ९ ना
रदउवाच इत्युदीर्यततोवज्रीवज्रेणैनमहन्दृढं तेनास्यकंठोनीलत्वमगाद्वज्रंचभस्मतां १० ततोरुद्रःप्रजज्वालतेजसाप्रदहन्निव दृ
ष्ट्वाबृहस्पतिस्तूर्णंकृतांजलिपुटोऽभवत् इंद्रंचदंडवद्भूमौकृत्वास्तोतुंप्रचक्रमे ११ बृहस्पतिरुवाच नमोदेवाधिपतयेत्र्यंबकायकपर्दि
ने १२ त्रिपुरघ्नायसर्वायनमोंधकनिषूदने विश्वरूपातिरूपाय बहुरूपायशंभवे १३ यज्ञविध्वंसकर्त्रेचयज्ञानांफलदायिने
कालांतकायकालायभोगिभोगधरायच १४ नमोब्रह्मशिरोहंत्रेब्रह्मण्यायनमोनमः नारदउवाच एवंस्तुतस्तदाशंभुर्भाषतानजगाद
तं १५ इंद्रस्यजीवदानेनजीवेतित्वंपर्याव्रज १७ बृहस्पतिरुवाच यदितुष्टोसिदेवेशत्वंपाहिद्रंशरणागतं अग्निरोषस्तंपातुभाल
नेत्रसमुद्भवः १८ ईश्वरउवाच पुनःप्रवेशमायातिभालनेत्रेकथंशिखी एनंत्यक्ष्याम्यहंदूरेयथेंद्रंनैवपीडयेत् १९ नारदउवाच
इत्युक्त्वातंकरेधृत्वाप्राक्षिपल्लवणार्णवे सोपततसिंधुगंगायां सागरस्यचसंगमे २० तावत्सबालरूपत्वमगात्तत्ररुरोदह रुदत
स्तस्यशब्देनभूकंपोभवन्मुहुः २१ स्वर्गश्चसत्यलोकश्च तत्स्वनाद्बधिरीकृताः श्रुत्वाब्रह्माययौतत्रकिमेतदितिविस्मितः २२ ताव

त्समुद्रस्योत्संगगतं बालं सददृशिह दृष्ट्वा ब्रह्माणमायांतं समुद्रोपि कृतांजलिः २३ ततो ब्रह्माब्रवीद्वाक्यं कस्यायं शिशुरुत्तमः निशम्याथ वचो
धातुर्वाक्यं सिंधुरथाब्रवीत् २५ समुद्र उवाच भो ब्रह्मन्सिंधुगंगायां जातोयं मम पुत्रकः जातकर्मादिसंस्कारान्कुरुष्वास्य जगद्गुरो २६
प्रणम्य शिरसा बालं तस्योत्संगे निवेशयेत् नारद उवाच एवं वदति पाथोधौ स बालः सागरात्मजः २७ ब्रह्माणमग्रहीत्कूर्चे विधुन्वे
न्तं मुहुर्मुहुः धुन्वतस्तस्य कूर्चं तु नेत्राभ्यामगमज्जलं २८ कूर्चं चिन्मुक्तकूर्चस्तु ब्रह्मा प्राह च सागरं ब्रह्मोवाच नेत्राभ्यामुद्धृतं यस्मा
देनेनैव जलं मम २९ तस्माज्जलंधर इति नाम्ना ख्यातो भवत्वसौ अधुनैवैष तरुणः सर्वशास्त्रार्थपारगः ३० अवध्यः सर्वभूतानां वि
ना रुद्रं भविष्यति यत एव समुद्भूतस्तत्रैवांते गमिष्यति ३१ नारद उवाच इत्युक्त्वाशुक्रमाहूय राज्ये तं चाभ्यषेकयत् आमंत्र्य सरि
तां नाथं ब्रह्मांतर्द्धानमागमत् ३२ अथ तद्दर्शनोत्फुल्लनयनः सागरस्तदा कालनेमिसुतां वृंदां तद्भार्यार्थमयाचत ३३ ते कालने
मिप्रमुखाश्चासुरास्ततस्तस्मै सुतां स्वां प्रददुः प्रहर्षिताः स चापि तां प्राप्य सुहृद्वरां वशी शशास सगां भुवं महाप्रतापवान्वली ३४ इ
ति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमाहात्म्ये जलंधरोत्पत्तिर्नाम नवमोऽध्यायः ९ नारद उवाच ये देवैर्निहताः पूर्वं दैत्याः पातालसं
स्थिताः तेपि भूमंडले जाता निर्भयास्तदुपाश्रिताः १ कदाचिच्छिन्नशिरसं दृष्ट्वा राहुं स दैत्यराट् पप्रच्छ भार्गवं तत्र शिरश्छेदस्य कारणं
२ शशंस स तु समुद्रस्य मथनं देवकारणं रत्नप्रहरणं देवैर्दैत्यानां च पराभवं ३ संश्रुत्वा क्रोधताम्राक्षः स्वपितुर्मथनं तदा दूतं प्रस्था
पयामास घस्मरं शक्रसन्निधौ ४ दूतस्त्रिविष्टपं गत्वा सुधर्मां प्राप्य सत्वरं जगादैव वचो लिस्तु देवेंद्रं वाक्यमब्रवीत् ५ घस्मर उवा॥

कार्तिक० च जलंधरोद्भूतनयः सर्वदैत्यजनेश्वरः दूतोऽहं प्रेषितस्तेन स यदाह शृणुष्व तत् ९ कस्मात्त्वया मम पिता मथितः सागरोऽद्रिणा नीतानि
१९ सर्वरत्नानि तानि सर्वाणि पक्षतः नारद उवाच इति दूतवचः श्रुत्वा विस्मितस्त्रिदशाधिपः उवाचाचरमं दूतं भयरोषसमन्वितः इंद्र उवाच
श्रृणु दूत मया पूर्वं मथितः सागरो यथा अद्रयो मद्भयाद्भ्रस्ताः स्वकुक्षिस्थास्तथा घ्नताः १० अन्येऽपि मद्द्विषः सर्वे तेन रक्षिता दितिजासुरा त
स्मात्तद्रत्नजातं तु मया प्राप्य हृतं किल शंखोऽप्येवं पुरा देवान्द्विषन् सागरात्मजः ममानुजेन निहतः प्रविष्टः सागरोदरे ११ तत्कथय
यस्मात्स्वसर्वं कथय कारणं नारद उवाच इत्थं विसर्जितो दूतस्तदिदं द्रुतगामवं १२ तदिंद्रवचनं दैत्यराजोऽनंतं कथयत्तदा तन्निशम्य त
तो दैत्यो रोषात्प्रस्फुरिताधरः १३ उद्योगमकरोत्तूर्णं सर्वदेवजिगीषया तदोद्योगे सुरेंद्रस्य दिग्भ्यः पातालतस्तथा १४ अथ संभ्रमनिशुं त ६
भाश्चैव बलाधिपतिकोटिभिः गत्वा त्रिविष्टपं दैत्यानंदनोऽभिमुखोऽभवत् १५ निर्ययुस्त्वमरावत्यां देवा युद्धाय दंशिताः पुरस्कृत्य
त्रिदशं ते दृष्ट्वा दैत्यबलं महत् १६ ततः समभवद्युद्धं देवदानवसेनयोः मुशलैः परिघैर्बाणैर्गदापरिघशक्तिभिः १७ तेऽन्योन्यं समधा
वेताजघ्नुश्च परस्परं क्षणेनाभवतां सेने रुधिरौघपरिप्लुते १८ पतितैः पात्यमानैश्च गजाश्वरथपत्तिभिः व्यराजत रणोमूमिः सं
ध्याभ्रपटलैरिव १९ तत्र युद्धे मृतान्दैत्यान्भार्गवस्तदतिष्ठिपत् विद्यया मृतजीविन्याभिमंत्रितैस्तोयविंदुभिः २० देवानपि तथा युद्धे जीवय तत्रा ३
दंगिरा दिव्यौषधिसमानीय द्रोणाद्रेः स पुनः पुनः २१ दृष्ट्वा देवान्तथा युद्धे पुनरेव समुत्थितान् जलंधरः क्रोधयुक्तो भार्गवं वाक्यम
मब्रवीत् २२ जलंधर उवाच दिव्यौषधीः समानीय द्रोणाद्रेरंगिरासुरान् जीवत्येष वै शीघ्रं द्रोणाद्रिं तमुपाहरत् २३ नारद उवाच

इत्युक्ते सति दैत्येंद्रे ... त्वा द्रोणाचलं तदा प्राक्षिपत्सागरे तस्मिन् पुनरायान्महाहवं २४ अथ देवान् हतान् दृष्ट्वा द्रोणाद्रिमगमद्गुरुः तां
श्च तत्र गिरिं दृष्ट्वा न ददर्श सुरार्चितः २५ ज्ञात्वा दैत्यहृतं द्रोणं विषण्णोऽथ विह्वलः अथागत्य पुरं दृष्ट्वा जगाम सुश्वासाकुलितविग्रहः २६ गु
रुरुवाच पलायध्वं महादैत्यो नायं जेतुं क्षमो यतः रुद्रांशसंभवो ह्येष स्मरध्वं शक्रचेष्टितं नारद उवाच श्रुत्वा तद्वचनं देवा भय
विह्वलितास्तथा दैत्येनैव वध्यमानास्ते पलायंत दिशो दश २८ देवान्विद्रावितान् दृष्ट्वा दैत्यः सागरनंदनः शंखभेरीजयरवैः प्रविवे
शामरावतीं २९ प्रविष्टे नगरीं दैत्ये देवाः शक्रपुरोगमाः सुवर्णाद्रिगुहां प्राप्ता न्यवसन् दैत्यतापिताः ३० ततः सर्वेष्वसुराधिका
रेषु शुंभादिकान् विनिवेशयत्तदा शुंभादिकान् दैत्यवरान् पृथक् पृथक् स्वयं सुवर्णाद्रिगुहामगान्नृप ३१ इति श्रीपद्मपुराणे उत्तरखं
डे कार्तिकमाहात्म्ये अमरावतीविजयो नाम दशमोऽध्यायः १० नारद उवाच पुनर्दैत्यं समायातं दृष्ट्वा देवास्सवासवाः भयप्रकंपिताः
सर्वे विष्णुस्तोत्रं प्रचक्रमुः १ देवा ऊचुः नमो मत्स्यकूर्मादिनानास्वरूपैः सदा भक्तकार्योद्यतायार्तिहर्त्रे विधात्रादिसर्गस्थितिध्वंस
कर्त्रे गदाशंखपद्मादिहस्ताय तेऽस्तु २ रमावल्लभायासुराणां निहंत्रे भुजंगारियानाय पीतांबराय मखादिक्रियापाककर्त्रे विहंत्रे शर
ण्याय तस्मै नताः स्मो नताः स्मः ३ नमो दैत्यसंतापितामर्त्यदुःखाचलध्वंसदंभोलये विष्णवे ते भुजंगेशतल्पेशयायार्कचंद्रद्विनेत्राय
तस्मै नताः स्मो नताः स्मः ४ नारद उवाच संकष्टनाशनं स्तोत्रमेतद्यस्तु पठेन्नरः स कदाचिन्न संदेहः पीड्यते कृपया हरेः ५ इति देवाः
स्तुतिं यावत्कुर्वंति दनुजार्दिताः तावत्सुराणामायाति विदितानां विष्णुना तदा ६ सहसोत्थाय दैत्यारिः कृपयाविष्टमानसः प्राह

कार्तिक

१०

ते

स्वगरुडं वेगात्स्तस्मै व चनमब्रवीत् ७ श्रीरुवाच निद्रां विहाय तुरया गरुडारोहणं कृतं किं कार्यं गमिष्यसि कुत्र वक्तव्यं संप्रतं म
म ८ विष्णुरुवाच जलं धरेण तेनाजौ देवानां कदनं कृतं तेषां दुःखं ततो गमिष्यामि युद्धाय तित्वराऽन्वितः ९ श्रीरुवाच अहं ते वल्ल
भा नाथ भक्ता चमाद्दिसर्व दा तत्कथं ते मम भ्राता युद्धे वध्यः कृपानिधे १० विष्णुरुवाच स्नेहाद्रासंभवाच्चैव ब्रह्मणो वचनादपि प्रीत्या
ते वचनैर्यापंमयावध्यो वध्यो जलंधरः १० नारद उवाच इत्युक्त्वा गरुडारूढः शंखचक्रगदासिभृत् विष्णुर्वेगाद्ययौ योद्धुं यत्र देवाः
स्तुवंति ते ११ अथ पारु णानुजात्सुमपक्षवातप्रपीडिताः वात्या विघूर्णिता दैत्या बभ्रमुः खे यथा घनाः १२ ततो जलंधरो दृष्ट्वा दैत्या
न् वातप्रपीडितान् उ द्धृत्य नयनं क्रोधाद्धाततो विष्णुसमभ्यगात् १३ ततः समभवद्युद्धं विष्णुदैत्येंद्रयोर्महत् आकाशं कुर्वतो वाणै
स्तथा निरवकाशवत् १४ विष्णुर्दैत्यस्य वाणौघैर्ध्वजं छत्रं धनुर्हयान् चिच्छेद तं च हृदये वाणेनैकेन ताडयत् १५ ततो दैत्यः समुत्प
त्य गदापाणिस्त्वरान्वि तः आहत्य गरुडं मूर्ध्नि पातयामास भूतले १६ विष्णुर्गदां स्वखड्गेन चिच्छेद प्रहसन्निव तावत्स हृदये विष्णुं जघा
न दृढमुष्टिका १७ त तौ बाहुयुद्धेन युयुधाते महाबलौ बाहुभिर्मुष्टिभिश्चैव जानुभिर्नादयन्महीं १८ एवं तु सुचिरं युद्धं हित्वा वि वं ४
ष्णुः प्रतापवान् उवाच दैत्यराजानं मेघगंभीरया गिरा १९ विष्णुरुवाच वरं वरय दैत्येंद्र प्रीतोऽस्मि तव विक्रमात् अदेयमपि दद्मि य ते
ते मनसि वर्तते २० ज लंधर उवाच यदि भावुक तुष्टोसि वरमेकं ददस्व मे मद्भगिन्या सहितया मद्गेहे सगणो वस २१ नारद उवाच तथे
त्युक्त्वा स भगवान्सर्व देवगणैः सह जलंधरं नाम पुरं जगाम कमलासह २२ जलंधरो देवानामधिकारेषु दानवान् स्थापयित्वा सदैवः स्व

८

नरायान्महीतले च देवगंधर्वसिद्धेषु यत्किंचिद् रत्नसंचितं तदात्मवशगं कृत्वा तिष्ठत्सागरनंदनः २४ पातालभवने दैत्यनिशुंभं
सम महाबलं स्थापयित्वा ससेनादिव्यानपद्मतले बली २५ देवगंधर्वसिद्धौघान् सर्वेरागानसमानुषान् स्ववशे नागरान्कृत्वा शशास भुवनत्र
यं २६ स्वयं जलंधरः कृत्वा देवान्वशवर्त्तिनः धर्मेणापालयामास प्रजाः पुत्रानिवौरसान् २७ न कश्चिद्व्याधितो नैव दुःखितो न कृ
शस्तथा न दीनो दृश्यते तस्मिन् धर्माद्राज्यं प्रशासति २८ एवं महीं शासत दानवेंद्रो धर्मेण तासमस्तके सपद्द छपाहं कदाचिदाससमयं तस्य
लक्ष्मीं विलोकितुं भ्रीरमलौ च सविलु २९ इतिश्रीपाद्मे उ०ख०कृ०सं० जलंधरोपाख्याने नामैकादशोध्यायः ११ नारद उवाच समस्त
रूपविधिवद्दानवेंद्रो गतिमातिलेत्तः संप्रहृष्टस्तदावाक्यं जगाद मुनिसत्तम १ जलंधर उवाच कुत आगम्यते ब्रह्मन् किंचिद्दृष्टं त्वया क्व
चित् वदस्व मे ह यत्रायातस्तदाख्याहि मे मुने २ नारद उवाच गतः कैलासशिखरे दैत्येंद्राहं यदृच्छया तत्रोमया महासीनं दृष्टवानस्मि
शंकरं ३ योजनायुतविस्तीर्णे कल्पद्रुममहावने कामधेनुशताकीर्णे चिंतामणिसुदीपिते ४ तं दृष्ट्वा महदाश्चर्यं वितर्कोऽभवं म ६
तदा क्वापीदृशी भवेद्विद्धिस्त्रैलोक्ये वा न वेति वा ५ तावत्तवापि दैत्येंद्र समृद्धिः संस्मृता मया तद्विलोकनकामोऽहं त्वत्सान्निध्यमिहाग
तः ६ त्वत्समृद्धिमिमां पश्यन् स्मारं त्वसौ हतौ ध्रुवं कल्पवासिनिशिवादन्यः त्रिलोक्यां न समृद्धिमान् ७ यस्मात्तावरजलधौनिम
ग्नश्च तु रत्नानि स्वर्धेयमसुचेप्सितयाकंन्यापमीयते ८ वीतरागोपि हि यया मदनारिः स्वलीलया विश्वतं त्रोपि हि तयास्वात्मानो
वशगाः कृतः ९ अप्सरो नागकन्याद्या यद्यपि त्वद्गृहे स्थिता ता यापिता वत्पार्वत्या हत्ये गोमदृशी ध्रुवं १० सौंदर्यगहने भ्रान्त्व
रोहपयापुरा हरोनिःकाममुक्तोपि वशगोपि वशीकृतः ११ यस्याः पुनः पुनः संप्रश्च हपंचात्ताविसर्जिते तासमं जोम्भरसःस्वासांत

कार्तिक तस्मै कापि नाभवत् १२ अतः स्त्रीरत्नमेतं संभोक्तुं समर्हसि त्वमसावपि तथा न तत्र वै दैत्येंद्र सर्वभोगाधिपस्य च १३ एवमुक्ते तमामंत्र्यागते
मयि स दैत्यराट् तद्रूपश्रवणाद्दास्यादनंगज्वरपीडितः १४ अथ संप्रेरयामास दूतं सैंहिकासुतं अवकायनतया किंचिद्दिक्षु मायाविमो
११ हितः १५ कैलासमगमद्राहुः सर्वशुक्लं दुर्वचसं कैलासं न कलशवेदं दुर्वचो साक्षाद्गजेन तु १६ निवेदयन्तदादेशं नंदिना संप्रवेशितः भ्रूविक्ष
प्ररूढतासंज्ञा शंभोस्तितो वाक्यमब्रवीत् १७ राहुरुवाच देवपन्नगसेव्यस्य त्रैलोक्याधिपतेस्तथा सर्वरत्नेश्वरस्याज्ञां मत्तो मम श्रृणु वृषभध्वजाद
श्मशानवासिनो नित्यमस्थिमाल्यधरस्य च दिगंबरस्य ते भार्या कथं हैमवती शुभा १९ अहं रत्नाधिनाथोस्मि सा च स्त्रीरत्नसंज्ञका त
स्मान्ममैव सा योग्या नैव भिक्षाशनस्य च २० नारद उवाच वदत्येवं तदा राहौ भ्रूमध्याच्छूलपाणिनः अभवत्पुरुषो रौद्रः तीव्राशनिसम
स्वनः २१ सिंहास्यः प्रचलज्जिह्वः सज्वालनयनो महान् ऊर्ध्वकेशः शुष्कतनुर्नृसिंह इव चापरः २२ स तं खादितुमायांतं दृष्ट्वा राहुर्भया
तुरः अधावत्सोतिवेगेन बहिः स च दधार तं २३ ब्राह्मणोस्मि महादेव खादितुं मां समागतः एतस्माद्रक्ष देवेश शरणागतवत्सल २४ महादे
वो वचः श्रुत्वा ब्राह्मणस्य तदाब्रवीत् मुंचेति पुरुषः श्रुत्वा राहुं तत्याज सोंबरे २५ राहुं त्यक्त्वा स पुरुषो महादेवं व्यजिज्ञपत् पुरुष उवाच क्षु
धा मां बाधते स्वामिन् क्षुधार्तोस्मि सर्वथा २६ किं भक्ष्यं मे महाभाग तदाज्ञापय मां प्रभो ईश्वर उवाच भक्षयस्वात्मनो मांसं सम्यक् त्वं ह
स्तपादयोः २७ नारद उवाच स शिवेनैवमाज्ञप्तः खादत्पुरुषः स्वकं हस्तपादोद्भवं मांसं शिरःशेषोभवत्तदा २८ दृष्ट्वा शिरोवशेषं
तं सुप्रसन्नस्तदा शिवः पुरुषं भीमकर्माणं तमुवाच सविस्मयः २९ ईश्वर उवाच त्वं कीर्तिमुखनामाख्यो मम त्वं द्वारगः सदा त्वदर्चां
मे न कुर्वंति नैव ते मम प्रियकराः ३० नारद उवाच तदाप्रभृति देवस्य द्वारे कीर्तिमुखः स्थितः नार्चयंतीह ये पूर्वं तेषामर्चा वृथा भवेत्

राहुर्विमुक्तोयस्तेनसोऽपतद्धरणीतले अतःसर्वेचरामूतइतिलोकेप्रथांगतः ३२ ततश्चराहुःपुनर्जातमात्मानमस्मिन्नितिमन्यमानः
समेत्यसर्वेसकथावभूवजलंधरायरावितेचेष्टितंतत ३३ इतिश्रीपद्मपुराणेकार्तिकमाहात्म्येशिवदूतसंवादोनामद्वात्रिंशोऽध्यायः ३२ नार
दउवाच जलंधरस्तुतंश्रुत्वाकोपाकुलितमानसः निर्जगामसुदैत्येंद्रकोटिभिःपरिवारितः १ गतस्तस्याग्रतःशुक्रोराहुर्दृष्टिस्थितोऽभवत मु
कुटश्चापतद्भूमौवेगात्प्रस्खलितस्तदा २ दैत्यसैन्यावृतैस्तत्रविमानानांशतैस्तदा अगजत्तनभस्तूर्णंप्रावृट्काले यथाघनैः ३ तस्योद्योगं
तथादृष्ट्वादेवाःशक्रपुरोगमाः अलक्षिताःसुराजग्मुःस्तुतिनेतुंविजितमपुः ४ देवाऊचुः नजानासिकथंस्वामिन्देवापत्तिमिमांप्रभोतदुत्त
दूत्यागोपायजहिसागरनंदनं ५ नारदउवाच इतिदेववचःश्रुत्वाप्रहस्यवृषभध्वजः महाविष्णुंसमाहूयवचनंचेदमब्रवीत ६ ईश्वरउ
वाच जलंधरःकथंविष्णोनहतःसंगरेत्वया तद्भयाद्यापिजातोसित्वंकावैकुंठमात्मनः विष्णुरुवाच तवांशसंभवत्वाच्चभ्रातृत्वाच्च
तथाश्रियः नमयानिहतःसंख्येत्वमेनंजहिदानवं ८ ईश्वरउवाच नायमेभिर्महातेजाःशस्त्रास्त्रैर्वध्यतेमया देवैःसहस्वतेजांशःशस्त्रा
दैत्यपतेमम ९ नारदउवाच अयंविष्णुमुखादेवाःस्वतेजांसिददुस्तदा तान्येकमागतेतोशोदृष्ट्वाश्चमहस्तदा १० तेनाकरोन्महादे
वोसहस्रांशसमुत्तमं चक्रंसुदर्शनंनामज्वालौघतिभीषणं ११ ततःशेषेनचतदाचक्रेचैवाकरोद्धरः तावज्जलंधरोदृष्ट्वाकैलाशतलमभि
षु १२ हस्त्यश्वरथपत्तीनांकोटिभिःपरिवारितः सहचालक्षिताजग्मुर्देवाःसैन्येनचागतं १३ गणाश्चसमनह्यंतपुष्पमालान्विताःनं
दीमचस्यसेनानीमुख्याःसर्वेशिवारायाः १४ एवंनंतगणाःसाकेःकैलाशाद्युद्धदुर्मदाः ततःसमभवद्युद्धंकैलासोत्थिकाभुवि १५
प्रमथाधिपदैत्यानांसेनाशस्त्रायौघकुलं भेरीमृदंगशंखवाद्यैर्निःस्वनैर्वीररूपिणः १६ गजाश्वरथशब्दैश्चनादितामभ स्वर्गकंपत शक्तिता

ता५

सत्या३

कार्तिक मरवाणाद्यैर्मुषलैः परिघपट्टिशैः १७ विराजततमः पर्यंगुल्काभिः संवृतं यथा निहतैर्नरनागाश्वपतितैर्भूमिराजत १८ वज्रह
स्ताचलाशिरः कमलैरिव संवृतः प्रमथाहतदैत्यौघैर्देहा हतगरोलया १९ वसाहृज्जांसपंकाढ्याभूरगम्याभवत्तदा प्रमथाहतदै
१२ त्योघान्भार्गवः समजीवयत् २० युद्धे पुनः पुनश्चैव मृतसंजीवनीबलात् तान्दृष्ट्वा व्याकुलीभूत्वा गणाः सर्वे भयार्दिताः २१ शंभु
देवदेवाय तत्सर्वं भृगुजचेष्टितं अथ रुद्रमुखात्कृत्या बभूवातीवभीषणा २२ तालजंघोदरी वक्त्रस्तनपीडितभूरुहा सा युद्धभूमि
मासाद्य भक्षयंती महासुरान् २३ भार्गवं स्वभगे कृत्वा जगामांतर्हिता नभः विद्युतं भार्गवं दृष्ट्वा दैत्यसेनागणास्तदा २४ प्रम्लानवदनं
हर्षान्निर्गणपुर्युद्धदुर्मदाः अथ पराजिता दैत्यानां सेनागणभयार्दिता २५ वायुवेगहतापद्रुतप्रकीर्णा तूलसंहतिः भग्नांगणाम
यान्तीं तां दृष्ट्वा हर्षपुर्गणाः २६ निशुंभशुंभसेनान्यो कालनेमिश्च वीर्यवान् न्यपतंस्त्वारयामासुर्गणांस्तां महाबलाः २७ मुचं
तः शरवर्षाणि प्रावृषीव बलाहकाः पेतुर्दैत्यशरौघास्ते सलभा नाभिवव्रजाः २८ सुरस्युः स्वेदिशः सर्वा गणास्तेनाप्रकंपयरंगताः
शरसैतैर्भिन्नाः सरुधिरास्रवर्षिणः २९ वसंतकिंशुकाभासा न प्रस्रावतां किंचन पतिताः पात्यमानाश्च छिन्नभिन्नास्तथा गणाः ३० स
त्वा संग्रामभूमिं ते सर्वेपि विमुखा भवन् ३१ ततः प्रभग्नं स्वबलं विलोक्य शैलादिलंबोदरकार्तिकेयाः त्वरान्विता दैत्यवरान्सम्यनि
वारयामासुरहर्षणास्ते ३२ इति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमहात्म्ये दैत्यसेनावधोनाम त्रयोदशोध्यायः १३ नारद उ
वाच तेगणाधिपतीन्दृष्ट्वा नंदीभैरवषण्मुखान् प्रमथादभ्यधावंत हृष्टा युद्धाय दानवाः १ नंदिनं कालनेमिस्तु शुंभो लंबोदरं त
था निशुंभः षण्मुखं वेगाद्भ्यधावदशंकितः २ निशुंभः कार्तिकेयस्य मयूरं पंचभिः शरैः हृदि विव्याध वेगेन मूर्छितः स पपात ह ३

ततः शक्तिधरः शक्तिं यावज्जग्राह रोषितः तावन्निशुंभवेगेन त्वरात्पातमपातयत् ४ ततो नंदी त्वरो बाणैः कालनेमिमविध्यत सप्त
भिस्त्र हयान्केतुं धनुः सारथिमच्छिनत् ५ कालनेमिस्तु संक्रुद्धो धनुश्छित्वा नंदिनः तदपास्य स शूलेन तं वक्षस्यहनद्दृढं ६ सशूल
भिन्नहृदयो हताश्वो हतसारथिः अद्रेः शिवं स्मरन्नुद्यम्य शैलाद्रिं सोप्यपातयत् ७ अथ जंभो गणेशश्च रथमूषकवाहनौ युध्यमानौ शरै
र्बाणैः परस्परमभिघ्नतां ८ गणेशस्तु तदा जंभं हृदि विव्याध पत्रिणा सारथिं च त्रिभिर्बाणैः पातयामास भूतले ९ ततो ति क्रुद्धः जंभोपि
बाणाघवृष्ट्या गणाधिपं मूषकं च त्रिभिर्विद्ध्वा ननाद जलदस्वनः १० मूषकः शरभिन्नांगश्चचार दृढवेदनः लंबोदरश्च पतितः पदातिर
भवन्नृप ११ ततो लंबोदरः शुंभं हत्वा परशुना हृदि अपातयत्तदा भूमौ मूषकं चारुहत्पुनः १२ कालनेमिर्निशुंभश्च जंभो लंबोदरं शरैः पु
रे तु जघ्नुः क्रोधात्ते मेरुं च महाद्विपाः १३ तं पीड्यमानमालोक्य वीरभद्रो महाबलः अभ्यधावत्त वेगेन भूतकोटियुतस्तथा १४ कू
ष्मांडभैरवाश्चापि वेतालायोगिनीगणाः पिशाचा राक्षसाश्चैव गणाश्चापि तमन्वयुः १५ ततः किलकिलाशब्दैः सिंहनादैश्च घर्घरैः
विनादितां तु महकैः पृथिवीं समकंपयत् १६ ततो भूतान्यधावंत भक्षंत्यस्म दानवान् उत्पतंत्यापतंत्यस्म ननृतुश्च रणांगणे १७
नंदिनः कार्तिकेयश्च समाश्वस्य त्वरान्वितौ निजघ्नतुः रणे दैत्यान्निरंतरशरव्रजैः १८ छिन्नभिन्नहतैर्दैत्यैः पातितैर्भक्षितैस्तदा व्या
कुलासीद्भवत्सेना विच्छिन्नवदना तदा १९ प्रविद्रुतास्ततः सेनां दृष्ट्वा संग्रामनंदनः रथेनातिपताकेन गणानां सम्मुखो ययौ २० ह
त्वा च रथसंघातः शंखभेरीरवास्तथा अभवन्सिंहनादाश्च सेनयोरुभयोरपि २१ जंभं धरः शरव्रातैः नीहारपटलैरिव छायावयपि
व्योम छन्नमंतरं समपद्यत २२ गणेशं पंचभिर्विद्ध्वा शैलादिं नवभिः शरैः वीरभद्रं चाविंशत्या ननाद जलदस्वनः २३ कार्तिकेयस्ततो दे

कार्तिक० त्सेशानदाहात्तमाविद्याधरेश्वरः व्याघूर्णितः शक्तिनिर्भिन्नः किंचिद्व्याकुलमानसः २४ ततः क्रोधपरीतात्मा कार्त्तिकेयं जलंधरः गद
याताडयामास स च भूमितलेपतत् २५ तथैव नंदिनं कोपात्पातयन्मभूतले ततो गणेश्वरः क्रुद्धो गदां परशुनाच्छिनत् २६ वीरभद्रस्त्रि
१४ शिखेनोरसि विद्याधरदानवं सप्तभिश्च हयान्केतुं धनुश्छत्रं तु चिच्छिदे २७ ततोतिक्रुद्धो दैत्येंद्रः शक्तिमुद्यम्य दारुणां गणेशं पातयामास रथम
न्यं समारुहत् २८ अभ्यधावत्तवेगेन वीरभद्रं रुषान्वितः ततस्तौ सुरूपसंकाशौ युयुधाते परस्परं २९ वीरभद्रस्ततस्तस्य हयान्बाणैरपात
यत् धनुश्चिच्छिदे दैत्यस्य युयुधे परिघायुधः ३० नारद उवाच स वीरभद्रं त्वरया जघानाभिगम्य दैत्यः परिघेन मूर्छितः स चापि वीरस्त्र
विशिखेन मूर्द्धि पपात भूमौ रुधिरं समुद्गिरन् ३१ इति श्रीपद्मपुराणे उत्तरकार्तिकमाहात्म्ये चतुर्दशोऽध्यायः १४ नारद उवाच प
तितं वीरभद्रं तु दृष्ट्वा रुद्रगणोत्तमाः अगच्छन्नैरतौं हित्वा क्रोधमाना महेश्वरं १ अथ कोलाहलं श्रुत्वा गणानां चंद्रशेखरः अभ्य
धावद्वृषारूढः संग्रामं प्रहसन्निव २ रुद्रमायांतमालोक्य सिंहनादैर्गणास्ततः निवृत्तास्संगरे दैत्यान्निजघ्नुः शरवृष्टिभिः ३ दैत्याश्च
भीषणं दृष्ट्वा सर्वे चैव विदुद्रुवुः कार्त्तिकव्रतिनं दृष्ट्वा पातकानीव तद्भयात् ४ अथ जालंधरो दैत्यान्विद्रुतान्प्रेक्ष्य संगरे रोषाद्धा
वच्चंडीशं मुंचन्बाणान्सहस्रशः ५ शुंभनिशुंभप्रमुखैः कालनेमिबलाहकैः खंडरोमा प्रचंडश्च घस्मरश्च शिवं ययुः ६ बाणांधका
रसंछन्नं दृष्ट्वा गणाबलं शिवः बाणजालं स विच्छिद्य स्वबाणैरावृतानभः ७ दैत्यांश्च बाणवात्याभिः पीडितानकरोत्तदा प्रचंडबाणजालौ
घैरपातयत भूतले ८ खंडरोम्णः शिरः कोपात्तदा परशुनाच्छिनत् बलाहकस्य च शिरः खट्वांगेनाकरोद्द्विधा ९ बध्वा च घस्मरं दैत्यं पा
शेनाभ्यहनद्भुवि वृषभेन हताः केचित्केचिद्बाणैर्निराकृताः १० न शेकुरसुराः स्थातुं गजाः सिंहार्दिता इव ततः कोपपरीतात्मा वेगाद्रुद्रं

जलंधरः स्माहूपामास समरे तीव्रबाणानि समस्वरः पुष्पस्वार्थमथाप्तार्द्धं किमेभिर्निहतैस्तव १२ पश्यकिंचिच्छलं तेस्तितं दर्शय जलंधर ना
रद उवाच इत्युक्त्वा बाणान्स प्रत्याजघान वृषभध्वजं सतान्प्राप्तान्नरीतैर्बाणैश्छित्वा द्रुतं सलिलं व १४ ततो हयान्ध्वजं छत्रं धनुश्छित्वा द्रुतं स प्र
भिः सप्तभिः सद्य विव्याध गदामुद्यम्य वेगवान् १५ अभ्यधावत्ततो बाणैर्बाणौर्द्विधाकरोत्ततः तथापि मुष्टिमुद्यम्य ययौ रुद्रं जिघां
सया १६ तावद्देवेन बाणौघैः क्रोशमात्रमपाकृतः ततो जलंधरो दैत्यो मत्वा रुद्रं बलाधिकं १७ ससर्ज मायां गांधर्वीं मद्भुतां रुद्रमोहिनीं
ततो जगुश्च ननृतुः गंधर्वाप्सरसां गणाः १८ तालवेणुमृदंगाश्च वादयंतस्तथापरे तान्दृष्ट्वा महदाश्चर्यं रुद्रो नादविमोहितः १९ पति
तान्यपि शस्त्राणि करेभ्यो न विवेद सः एकाग्रीभूतमालोक्य रुद्रं दैत्यो जलंधरः २० कामार्त्तः स जगामाशु यत्र गौरी स्थिताभवत् युद्धे शुंभ
निशुंभाख्यौ स्थाप्य पिष्ट्वा महाबलौ २१ दशदोर्दंडपंचास्यस्त्रिनेत्रश्च जटाधरः महावृषभमारूढः सर्वतो रुद्रवज्जलंधरः २२ अथ रुद्रं समा
यांतमालोक्य भववल्लभा अभ्यायया सखीमध्यात्तद्दर्शनपथेभवत् २३ तावद्ददर्श चार्वंगीं पार्वतीं दनुजेश्वरः तावत्स वीर्यं मुमुचे ज
गौरीक्ष डांगश्चाभवत्तदा २४ अथ ज्ञात्वा तदा गौरी दानवं भयविह्वला जगामांतर्हिता वेगात्सा तदोत्तरमानसं २५ तामदृष्ट्वा ततो [illegible] दैत्यः क्षणाद्वि
द्युल्लतामिव जवेनाप्यगमद्युद्धं यत्र देवो वृषध्वजः २६ पार्वत्यपि महाविष्णुं सस्मार मनसा तदा तावद्ददर्श तं देवं सोपविष्टं समीप
गं २७ पार्वत्युवाच विष्णो जलंधरो दैत्यः कृतवान्परमाद्भुतं तत्किं न विदितं ते स्याच्चेष्टितं तस्य दुर्मतेः २८ श्रीभगवानुवाच तेनैव द
र्शितः पंथा वयमप्यनुयामहे नान्यथा स भवेद्वध्यः पातिव्रत्यात्तु रक्षितः २९ नारद उवाच जगाम विष्णुरित्युक्त्वा पुनर्जालंधरं पुरं नवा
रमायां दैत्यपत्न्यास्तु सा दुर्मोहिनीं अथ रुद्रश्च गांधर्वीं हित्वा मुक्तः संगरे स्थितः अंतर्धानं गतां मायां बुध्वा स च वचस्तदा ३१ ततः शिवोपि
३०

कार्तिक

१४

स्मितमाननः पुनर्जगाम गोपुरद्वाःपजलंधरं रुपा स चापि देवसुः पुनरागतः शिवं दृष्ट्वा पराक्रमैर्देशिकीर्माकिरद्गौ ३२ इति श्रीपद्मपुराणे उ
त्तरखंडे कार्तिकमाहात्म्ये चतुर्दशोऽध्यायः १४ नारद उवाच विष्णुर्जालंधरं गत्वा तद्देहं त्यक्त्वासौ देवं पातिव्रत्यस्य भंगाय वृंदायाः प्रका
रोन्मति १ अथ वृंदा तदा देवी तस्य पुरवरे स्वप्नमदर्शयत् भर्तारं महिषारूढं तैलाभ्यक्तं दिगंबरं २ कृष्णप्रसूनभूषाढ्यं क्रव्यादगणसेवितं
दक्षिणाशां गमन्मुंडं तमसा च वृतं तदा ३ स्वपुरं सागरे मग्नं सहसैवात्मना सह ततः प्रबुद्धा सा बाला तं स्वप्नं समचिंतयत् ४ ददर्शादि
त्यमादित्यं सच्छिद्रं निष्प्रभं मुहुः तदनिष्टमिति ज्ञात्वा रुदंती भयविह्वला ५ कुत्रचिन्नालभच्छर्म गोपुराट्टालभूमिषु ततः सखीद्वय
युक्ता नगरोद्यानमागमत् ६ तत्रापि सा तदा बाला नालभत्कुत्रचित्सुखं वनाद्वनांतरं याति नैव वेदात्मनस्तदा ७ ततः सा भ्रमती बा
ला ददर्शातीव भीषणौ राक्षसौ सिंहवदनौ दृष्ट्वा नयनभीषणौ ८ तौ दृष्ट्वातीव सा बाला पलायनपराभवत् ददर्श तापसं शांतं सशि
ष्यं मौनमास्थितं ९ ततस्तत्कंठे न्यस्य निजां बाहुलतां भयात् मुने मां रक्ष शरणमागतामित्यभाषत १० मुनिस्तां विह्वलां दृष्ट्वा राक्षसौ तस्या
नुगतौ तदा हुंकारेणैव तौ घोरौ चकार विमुखौ तदा ११ तद्धुंकारभयात्रस्तौ दृष्ट्वा तौ विमुखौ गतौ प्रणम्य दंडवद्भूमौ वृंदा वचनमब्रवीत् १२
वृंदोवाच रक्षिताहं त्वया घोराद्भयादस्मात्कृपानिधे किंचिद्विज्ञप्तुमिच्छामि कृपया तन्निशामय १३ जालंधरो हि मे भर्ता रुद्रं योद्धुं
गतः प्रभो स तत्रास्ते कथं युद्धे तन्मे कथय सुव्रत १४ नारद उवाच मुनिस्तद्वाक्यमाकर्ण्य कृपयोर्ध्वमवैक्षत तावत्कपी समायातौ
तं प्रणम्याग्रतः स्थितौ १५ ततस्तद्भ्रूलतासंज्ञानियुक्तौ गगनं गतौ गत्वा क्षणार्द्धादागत्य वानरावग्रतः स्थितौ १६ शिरः कबंधहस्तौ च दृ
ष्ट्वाब्धितनयस्य सा पपात मूर्छिता भर्तृव्यसनदुःखिता १७ कमंडलुजलैः सिक्ता मुनिना प्रक्षालिता तदा स्वमस्तं सालेसाभालेन

त्वादीनाहरोदह १८ वृंदोवाच यः पुरा सुरसंवादे विनार्यसि मां प्रभो स कथं न वदस्वाद्य वल्लभो मामनागसं १९ येन देवाः
सगंधर्वा येन विष्णुना सह स कथं तापसेनेत्थं त्रैलोक्यविजयी हतः २० नारद उवाच इति विलपितां तद्वृंदां तां मुनिर्वाक्यमब्रवीत
वृंदोवाच कृपानिधे मुनिश्रेष्ठ जीवयैनं मम प्रियं त्वमेवास्य पुनः शक्तो जीवनाय मतो मम नारद उवाच इति तस्या वाक्यमाक
र्ण्य प्रहसन्मुनिरब्रवीत २२ मुनिरुवाच नायं जीवयितुं शक्यो रुद्रेणाजौ हतो युधि तथापि त्वत्कृपाविष्टो नैनं संजीवयाम्यहं
२३ नारद उवाच इत्युक्त्वांतर्दधे यावत्तावत्सागरनंदनः वृंदामालिंग्य तत्प्रेम्णे चुचुंबे प्रीतमानसः २४ अथ वृंदापि भर्तारं दृ
ष्ट्वा हर्षितमानसा रेमे तद्वनमध्यस्था तद्युक्ता बहुवासरं २५ कदाचित्सुरतस्यांते दृष्ट्वा विष्णुं तमेव हि निर्भर्त्स्य क्रोध ते
संयुक्ता वृंदा वचनमब्रवीत २६ वृंदोवाच धिक्त्वेदं हरेः शीलं परदाराभिगामिनः ज्ञातोसि त्वं मया सम्यङ्मायाप्रच्छन्नतापसः
२७ यौ त्वया मायया ह्यस्य स्वकीयौ दर्शितौ मम तावेव राक्षसौ भूत्वा भार्यां तव हरिष्यतः २८ त्वं चापि भार्यादुःखार्तो वने विप
कपिः सहायवान् भ्रम सर्पेश्वरेणायं यस्ते शिष्यत्वमागतः २९ नारद उवाच इत्युक्त्वा सा तदा वृंदा प्राविशद्धव्यवाहनं वि
ष्णुना वार्यमाणापि तस्मिन्नासक्तमानसा ३० ततो हरिस्तामनुसंस्मरन्मुहुर्वृंदाचिताभस्मरजोवगुंठितः तत्रैव तस्थौ सुर
सिद्धसंघैः प्रबोध्यमानोपि ययौ न शांतिं ३१ इति श्रीपाद्मपुराणे उत्तरखंडे जलंधरोपाख्याने वृंदाया विष्णुसा[illegible]
नाम षोडशोध्यायः १६ नारद उवाच ततो जलंधरो दृष्ट्वा रुद्रमद्भुतविक्रमं चकार मायया गौरीं त्र्यंबकं मोहयन्नि[illegible]

कार्तिक०मा

रथोपरि गतां दृष्ट्वा रुदंतीं पार्वतीं शिवः निशुंभशुंभदैत्याभ्यां बाध्यमानां ददर्श सः २ गौरीं तथाविधां दृष्ट्वापि चाप्युद्वि-
ग्नमानसः अवाङ्मुखः स्थितस्तत्र आविश्य तपसः पराक्रमं ३ ततो जलंधरो वेगात्त्रिभिर्विव्याध सायकैः रुद्रं वृषभमग्रेऽरु-
१५ द्रं शिरस्युरसि चोदरे ४ ततो महेश्वरो मायां विष्णुना संप्रबोधितः रुद्ररूपधरो जातो ज्वालामालातिभीषणः ५ तस्याती-
वमहारौद्ररूपं दृष्ट्वा महासुराः नेशुः पुरः प्रवृद्धेभ्यस्तु भेजिरे तद्दिशो दश ६ ततः शापं ददौ रुद्रस्तयोः शुंभनिशुंभयोः समयु-
द्धपराङ्मुखौ तौ गौर्या वध्यौ भविष्यतः ७ पुनर्जलंधरो वेगाद्दृष्ट्वा शीर्षं निवर्तितः शरैः वाणांश्चकार संछन्नं प्रदामं तदलेमहतं ८
यावद्रुद्रश्चिच्छेद तस्य बाणगणान्नतो तावत्सपरिघेणाशु जघान वृषभं बली ९ वृषस्तेन प्रहारेण तु पराङ्गतो रणांग-
णात् रुद्रेण कृष्यमाणोपि नातिष्ठद्रणभूमिषु १० यदैव वृंदा स्वभर्तृपातिव्रत्यं च खंडितं जलंधरस्तदैवाभूद्धतपुंस्त्वो
गतविक्रमः ११ ततः परमसंक्रुद्धो रुद्रो रौद्रवपुर्धरः चक्रं सुदर्शनं वेगाच्चिच्छेद पादात्स्वयं कृतं १२ वृषदहनरौद्रोसौ वेगात्तदा
सायं जलंधरं जहार तस्य च शिरः कायान्महादेवस्त्रिलोचनः १३ तस्य कायः पपातोर्व्यां नादयन्वसुधातलं तेजश्च निर्गतं दे-
हात्तद्रुद्रे लयमागमत् १४ वृंदादेहोद्भवं तेजस्तद्गौर्यां लयमागमत् अथ ब्रह्मादयो देवा हर्षाद्गुन्तुस्त्रिलोचनं १५ प्रणम्य शि-
रसा रुद्रं शरण्यं विष्णुवेष्टितं देवा ऊचुः महादेव त्वया देवाः रक्षिताः शत्रुसंकटात् १६ किंचिदन्यत्समुद्भूतं तत्रोक्तं करवामहे दे-
वलावण्यसंभ्रांतो विष्णुस्तिष्ठति मोहितः १७ ईश्वर उवाच गच्छध्वं शरणं देवा विष्णोर्मोहापहं तु ये शरण्यं मोहितं मायया सा

वः कार्यं करिष्यति १८ नारद उवाच इत्युक्त्वांतर्दधे देवः सह भक्तगणोत्तदा देवाश्च तुष्टुवुर्मूलप्रकृतिं भक्तवत्सलां १९ देवा ऊचुः
यदुद्भवाः सत्त्वरजस्तमोगुणाः सर्गस्थितिध्वंसनिदानकारणा यदिच्छया विश्वमिदं भवाभवौ तनोति मूलप्रकृतिं नताः स्म तां २०
पाहि त्रयोविंशतिभेदसंस्थिता संख्यास्वरूपे बलसमाधिनिष्ठिता यद्रूपकं भागमजाव्ययोपि ते विदुर्न मूलप्रकृतिं नताः स्म तां २१
यद्भक्तियुक्ताः पुरुषास्तु नित्यं दारिद्र्यमोहपराभवादीन्न पश्यंति वै त्वं हि भक्तवत्सलां सदैव मूलप्रकृतिं नताः स्म तां २२
नारद उवाच स्तोत्रमेतत्त्रिसंध्यं यः पठेदेकाग्रमानसः दारिद्र्यमोहदुःखानि न कदाचित्स्पृशंति तं २३ इति स्तुवंति ते दे
वास्तेजोमंडलमास्थितं ददृशुर्गगने तत्र ज्वालाव्याप्तदिगंतरं २४ तन्मध्याद्भारतीं सर्वे शुश्रुवुर्व्योमचारिणीं आदिश
क्तिरुवाच अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः गौरी लक्ष्मीः स्वरा चेति रजःसत्त्वतमोगुणैः २७ तत्र गच्छत वः
कार्यं विधास्यंति वचः सुराः नारद उवाच शृण्वतामिति तद्वाक्यमंतर्धानमगान्महः २८ देवास्ते विस्मयोत्फुल्लने
त्राः सर्वे तदा नृप ततः सर्वेपि ते देवा गत्वा तद्वाक्यनोदिताः २९ गौरीं लक्ष्मीं सुरां चैव प्रणेमुर्भक्तितत्पराः वृंदाभस्म
विलिप्तांगं विष्णुं ताभ्यो निवेदयन् ३० ततस्ताः सुरनिर्दिष्टाः प्रणतान् भक्तिवत्सलाः बीजानि प्रददुस्तेभ्यो वाक्या
न्यूचुश्च भूमिप ३१ देव्य ऊचुः इमानि तत्र बीजानि विष्णुर्यत्रावतिष्ठति निर्वपध्वं ततः कार्यं भवतां सिद्धिमेष्यति ३२
नारद उवाच ततः प्रहृष्टाः सुरसिद्धसंघाः प्रगृह्य बीजानि विचित्रितुष्टाः वृंदाचिताभूमितले सपत्र विष्णुस्तदा ति
ति सौख्यवृत्तिः ३३ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये जलंधरवधो नाम सप्तदशोऽध्यायः १७ नारद उवाच॥

दिदेभ्यस्तद्बीजेभ्य वनस्पत्यत्रयोभवत् धात्री च मालती चैव तुलसी च नृपोत्तम १ धात्र्युद्भवा स्मृता धात्री मा भवा माल
ती स्मृता गौरीभवा च तुलसी तमःसत्वरजोगुणाः २ स्त्रीरूपिणो वनस्पत्यो दृष्ट्वा विष्णुस्तदा नृप उत्तस्थौ संभ्रमाद्धृ
द्रूपातिशयविभ्रमात् ३ दृष्ट्वा प्रार्थयते ताभिः कामासक्तेन चेतसा तं चापि तुलसी धात्री रागेणैवावलोकतां मध्ये
लक्ष्म्या पुरा बीजं मायया समर्पितं तस्मात्तद्भवा नारी तस्मिन्नीर्षापराभवत् ५ ततः सा च वर्वरीत्याख्या ममापत्ति
वगर्हिता धात्री तुलसी तत्र त्वात तस्य प्रीतिप्रदे सदा ६ ततो विस्मृतदुःखो सौ विष्णुस्ताभ्यां सहैव तु वैकुंठमगम
द्धृष्टः सर्वदेवनमस्कृतः ७ कार्तिके द्यापने विष्णोस्तस्मात्पूजा विधीयते तुलसीमूलदेशे तु प्रीतिदा सा यतः स्मृता
८ तुलसीकाननं राजन् गृहे यस्यावतिष्ठते तद्गृहं तीर्थरूपं तु नायांति यमकिंकराः ९ सर्वपापहरं पुण्यं कामदं तु
लसीभवं रोपयंति नराः श्रेष्ठास्ते न पश्यंति भास्करिं १० नर्मदादर्शनं नर्मदायां गंगास्नानं तथैव च तुलसीवनसंसर्गः
सममेतत्त्रयं स्मृतं ११ रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणां तुलसी दहते पापं वाङ्मनःकायसंचितं १२
तुलसीमंजरीभिर्यः कुर्याद्धरिहरार्चनं न स गर्भगृहं याति मुक्तिभागी न संशयः १३ पुष्करादीनि तीर्थानि गंगाद्याः
सरितस्तथा वासुदेवादयो देवा वसंति तुलसीदले १४ तुलसीमंजरीयुक्तो यदि प्राणान्विमुंचति विष्णोः सायुज्यमा
प्नोति सत्यं सत्यं नृपोत्तम १५ तुलसीमृत्तिकालिप्तो यस्तु प्राणान्विमुंचति ... नेहि तु शास्त्रो युक्तः पापशतैरपि १६
तुलसीकाष्ठजं यस्तु चंदनं धारयेन्नरः तद्देहं न स्पृशेत्पापं क्रियमाणमपीह यत् १७ तुलसीविपिनच्छाया यत्र यत्र भवेन्नृ

पतत्र श्राद्धं प्रकुर्वीत पितॄणां दत्तमक्षयं १८ तुलसीपत्रविभ्रंतु यत्किंचिद्दीयते नरैः कल्पकोटिसहस्राणि प्रीतो भवति के
शवः १९ धात्रीछायातु यः कुर्यात्पिंडदानं नपोत्तम तृप्तिं प्रयांति पितरस्तस्य ये नरकोस्थिताः २० मूर्द्धि पाणौ मुखे चै
व देहे च नृपसत्तम धत्ते धात्रीफलं यस्तु स विज्ञेयो हरिप्रियः २१ धात्रीफलं च तुलसी मृत्तिका द्वारकोद्भवा यस्य देहे
स्थिता नित्यं स जीवन्मुक्तिरुच्यते २२ धात्रीफले विमिश्रे स्तु तुलसीदलमिश्रितैः जलैः स्नाति नरस्तस्य गंगास्नानफलं
स्मृतं २३ तीर्थानि मुनयो देवाः यज्ञाः सर्वेपि कार्तिके नि धात्रीं समाश्रित्य तिष्ठंत्यत्र सुनाश्रिते २४ द्वादश्यां तुलसीपत्रं
श्रीप धात्रेंतु कार्तिके लुनाति स नरो गच्छेन्निरयानतिगर्हितान् २५ धात्रीछायां समाश्रित्य कार्तिकेन्नं भुनक्ति यः २६ अन्न
संसर्गीय पापं मासपर्यंत तस्य नश्यति २७ धात्रीमूलेतु यो विष्णुं कार्तिकेर्चयते नरः विष्णुः क्षेत्रेषु सर्वेषु पूजितस्तेन सर्व
दा २८ धात्रीतुलस्योर्माहात्म्यमपि देवो चतुर्मुखः न समर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः २९ धात्रीतुलस्योद्भवका
रणं यः शृणोति यः श्रावयते च मर्त्यः विधूतपापाः सह पूर्वजैस्ते स्वर्गं व्रजंत्यग्रविमानसंस्थाः ३० इति श्रीपद्मपुरा
णे कार्तिकमाहात्म्ये धात्रीतुलस्योर्माहात्म्यं नामाष्टादशोऽध्यायः १८ पृथुरुवाच सेतिहासमिदं व्रह्मन् माहात्म्यं कथि
तं त्वया अश्वत्थस्य च करसम्यक् तुलस्याश्च उक्तं मया १ यदूर्जे व्रतिनः सम्यक् फलं महदुदाहृतं तत्पुनर्ब्रूहि माहात्म्यं केन
चीर्णमिदं कथं २ नारद उवाच आसीत्सह्याद्रिसीमायां करवीरपुरे पुरा ब्राह्मणो धर्मवित्कश्चित् धर्मदत्तेति विश्रुतः ३
विष्णुव्रतकरः सम्यक् विष्णुपूजारतः सदा द्वादशाक्षरविद्यायां जपनिष्ठो तिथिप्रियः ४ कदाचित्कार्तिके मासि हरिजा

गच्छतोयस राक्षांतुर्थे शशेषायां जगाम हरिमंदिरं ५ हरिपूजोपकरणानि सप्रगस्य वभूतातदा तेन दृष्टा समायाता राक्षसी
भीमनिःस्वना ६ वक्रदंष्ट्राललज्जिह्वा निमग्नारक्तलोचना दिगंबरा शुष्कमांसा लंबोष्ठी घर्घरस्वना ७ तां दृष्ट्वा भयवित्रस्तः
कंपितावयवस्तदा पूजोपकरणैर्वेगात्तयाभिष्वाहनद्रुपात ८ संस्मृत्य स हरेर्नाम तुलसीयुक्तवारिणा सा हतत्वात कृत
स्मीतस्मः सर्वमगात्तद्दपं ९ अथ सा संस्मृत्य स्वपापं पूर्वजन्मकर्मविपाकजं स्वां दशां ब्राह्मणायोदि दंडवत्ते प्रणाम्यसा १० कलहो
वाच पूर्वकर्मविपाकेन दशामेतां गतास्म्यहं तत्कथं तु पुनर्विप्र प्राप्स्याम्यहं ह्युत्तमां गतिं ११ नारद उवाच तां दृष्ट्वा प्रणतामग्रे वद
मानां स्वकर्म तत अतीव विस्मितो विप्रस्तदा वचनमब्रवीत १२ धर्मदत्त उवाच केन कर्मविपाकेन त्वं दशामीदृशीं गता कुत्र
त्यं का च किं शीला तत्सर्वं कथयस्व मे १३ कलहोवाच सौराष्ट्रनगरे ब्रह्मन्भिक्षुर्नामाभवद्द्विजः तस्याहं गृहिणी पूर्वं क
लहाख्यातिनिष्ठुरा १४ न कदाचिन्मया भर्तुर्वचसापि शुभं कृतं नार्पितं तस्य मिष्टान्नं भर्तुर्वचनभंगया १५ साहं कलहप्रि
यानित्यं तेनोद्विग्नकरा सदा परत्नीता तदानोचमतिं चक्रे पतिर्मम १६ ततो गरं समास्वाद्य प्राणांस्त्यक्त्वा मयाद्विज अथ बद्ध्वा
वध्यमानां विनिन्युर्यमकिंकराः १७ यमस्तत्र तां दृष्ट्वा चित्रगुप्तमपृच्छत यम उवाच अनया किं कृतं सर्वं चित्रगुप्त वि
लोकय १८ प्राप्नोत्वेषा कर्मफलं शुभं वाशुभमेव च चित्रगुप्तस्ततो वाक्यं भर्त्सयन् सामुवाच स १९ चित्रगुप्त उवाच अन
यातु शुभं कर्म कृतं किंचिन्न विद्यते मिष्टान्नं भुंज्यमानायं भर्तरि तदर्पिते २० अतस्त्वं वल्गुलीयोन्यां नित्यं तिष्ठति स्ववि
ष्ठाहार भर्तृद्वेषात्सदाप्येषा नित्यं कलहकारिणी २१ विष्टादा सूकरीयोन्यां नित्यं तिष्ठत्वियं प्रभो पाकभांडे सदा भुक्ते नि



त्यैवैषा पतस्तदा २२ तस्मादेषा बिडालीत्तु साजाता मत्स्य मन्दिरे भर्त्तारमपि चोद्विग्य स्वात्मघातः कृतोनया २३ तस्मात्प्रेतशरीरे
पितिष्ठ त्वेषापि निन्दिता तत्रैषा महद्दैशे प्रापितव्याभटैः सह २४ यत्र प्रेत सरीरस्या चिरं तिष्ठ सिवं ततः इत्थं योनित्रयं तेषा पुन
स्त्व कर्म कारिणी २५ कलहोवाच सोहं पेचपत्ती व्यानि प्रेतदेहस्थिता किल क्षुत्तृष्णयापीडिता नित्यं दुःखिता स्वेन कर्मणा
२६ ततः क्षुत्पीडिता नित्यं शरीरं वणिजस्त्विह आयातादक्षिणे देशे कृष्णवेणाख्य संगमे २७ तत्तीरसंस्थिता याव तावत्तस्य शरी
रतः शिवविष्णुगणौ दूरमपाकृष्य बलादहं २८ ततः हेद्यामयाद्दृष्टा मम संस्थानं मया द्विज लब्धस्तोत्र तुलसीवारि प्राक्समात्वे
तमावतः २९ इत्थं निशम्य कलहावचसो द्विजाग्रणीः स्वकर्म कालमनुविस्मयः दुःखयुक्तः तद्दृष्टानि दर्शन कृपाचलचित्त
वृत्तिश्चिरं लाचिरंसवचनं निशमय दुःखात् ३० इति पद्मपुराणे कार्त्तिकमाहात्म्ये धर्मदत्त कलहाख्यानं नाम एकोनविं
शोऽध्यायः २९ धर्मदत्त उवाच विलयं यांति पापानि तीर्थस्नान व्रताधिभिः प्रेतदेहास्थिता यात्ते तेषु नेवाधिकारिता १ त
त्कर्मादर्शनात्स्मात्त खिन्नं च मम मानसं नैव हतित पापात्ति त्वामुद्दृश्य सुदुःखिता २ पातकं वत वालस्य ग्रन्थो नित्रयपिपा
केनैव नाल्पैः होयते पुण्यैः प्रेतत्वं चातिगर्हितं तस्माद्जन्मजनितं पत्र मया कार्तिकं कृतं ३ तत्सुपुण्यस्यार्द्धभागेन सद्गतिं वज
वाप्नुयात् ४ कार्त्तिकव्रतपुण्येन न साम्यं यान्ति सर्वथा यज्ञदानानि तीर्थानि व्रतानि नियमाद्ध्रुवं ५ नारद उवाच इत्युक्त्वा
धर्मदत्तोसौ श्रावयत्ताम [illegible]सवे च पत्र तुलसीमिश्रतोयेन श्रावयन् द्वादशाक्षरं ६ यावत्प्रेतत्वनिर्मुक्ता ज्वलदग्निशिखोप
मा दिव्यरूपधराजाता[illegible]भावलंपेन यथेन्दिरा ७ ततः सा दंडवद्भूमौ प्रणनाम प्रापतां द्विजं उवाच तु तदा वाक्यं हर्षगद्ग[illegible]णी

कार्तिक० रा ८ कलहोवाच त्वत्प्रसादाद्द्विजश्रेष्ठ विमुक्ता निरयादहं पापाब्धौ मज्जमानायास्त्वं नौस्त्वासीति मे ध्रुवं ९ नारद उवाच इत्येवं सा
वदंती विप्रं ददर्शायांतमंबरात् विमानं भास्वरं युक्तं विष्णुरूपधरैर्गणैः १० अथ तस्मात् विमानाग्राद्द्वास्थाभ्यामवरोपिता तद्विमानात
१८ प्रपन्नं धर्मदत्ताधिरोपिता पुण्यशीलसुशीलाभ्यामप्सरोगणसेवितं तद्विमानं तदा पश्यन् धर्मदत्तः सविस्मयः १२ पपात दंडवद्भूमौ
दृष्ट्वा तौ पुण्यरूपिणौ पुण्यशीलसुशीलौ च नत्वा तं प्रणतं द्विजं १३ समभ्यनंदयद्भक्त्या वचः पुण्यशीलिनौ गणावूचतुः साधु सा
धु द्विजश्रेष्ठ यस्त्वं विष्णुरतः सदा १४ दीनानुकंपी धर्मज्ञो विष्णुव्रतपरायणः आबाल्यात्मासा त्वच्छुभं हेतवे यत्त्वया कार्तिकव्रतं १५ कृ
तं तस्यार्द्धदानेन पुण्यार्द्धं सुलभमागतं सत्पुण्यस्यार्द्धभागेन पर्यस्याः पूर्वसंचितं १६ तुलसीपूजनाद्यैश्च नियमैः कार्तिके शुभैः विष्णु
सांनिध्यमसौ जाता त्वया दत्तैः कृपालुना १७ त्वमप्यस्यां भवस्यांते भार्याभ्यां सह यास्यसि वैकुंठभवनं विष्णोः सांनिध्यं च समरूपतां १८
ते धन्याः कृतकृत्यास्ते तेषां च सफलो भव येर्भक्त्याराधितो विष्णुः किं न यच्छति देहिनां १९ औत्तानिचरणो येन ध्रुवः स्थापितः पु
रा यन्नामस्मरणान्मोक्षं देहिनो यांति सद्गतिं २० ग्राहग्रहीतो नागेंद्रो यन्नामस्मरणात्पुरा विमुक्तः सांनिध्यं प्राप्तो जातो जयसंज्ञकः २१
अथ त्वया यदर्चितो विष्णुः स्वसान्निध्यं प्रदास्यति बहून्यब्दसहस्राणि भार्याद्वययुतस्य ते २२ ततः पुण्यक्षये जाते यदा यास्यसि भूत
ले सूर्यवंशोद्भवो राजा विख्यातस्त्वं भविष्यसि २३ नाम्ना दशरथस्तत्र भार्याद्वययुतः पुनः तृतीयया चानया वापि याते पुण्यार्द्धभा
गिनः २४ तत्रापि तव सांनिध्यं विष्णुर्यास्यति भूतले आत्मानं तव पुत्रत्वे प्रकल्प्यामर्त्यकर्मकृत् २५ तव जन्म हतात्तस्माद्द्विजसं
त्रिंशकारणात् न यज्ञा न च दानानि न तीर्थान्यधिकानि ते २६ धन्योऽसि विप्राग्र्य यतस्त्वयैवं हृतं हृतं तत्तु हि कार्तिकं व्रतं ह्यर्द्धभागात्

ब्धफलं मुरारेः प्रीणयेत्सततं भिरियं सलोकतां २९ इति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमाहात्म्ये विंशोध्यायः २० नारद उवाच इत्थं
तद्वचनं श्रुत्वा धर्मदत्तः सविस्मयः प्रणम्य दंडवद्भूमौ वाक्यमेतदुवाच ह १ धर्मदत्त उवाच आराधयंति सर्वेपि विष्णुं भक्तार्तिनाश
नं यैर्व्रतैर्विधानैर्वा तीर्थैस्तपोभिश्च मया विधिः २ विष्णुप्रीतिकरं तेषां किं न सान्निध्यकारकं पत्नीत्वात्तानि चीर्णानि सर्वाणि पापिभ
वेतिहि ३ गणावूचतुः साधु पृष्टं त्वया विप्र शृणुष्वैकाग्रमानसः सेतिहासां कथां विप्र कथ्यमानां मया भव ४ कांचीपुर्यां पुरा चो
ले चक्रवर्ती नृपोभव यस्य नाम्नाथ ते देशाश्चोला ख्याता भवन्ति कलौ ५ यस्मिन्शासति भूचक्रे दारिद्र्ये नैव दुःखितः पापबुद्धिस्तथा
व्याधिनैव कश्चिदभून्नरः ६ यस्याध्वरमांगलेऽन्नदेसा यज्ञैस्तेन तत तत्र तावत्पर्णितयानुभौ सुवर्णयूपैः सोमाख्या भाति चैत्ररथोप
मा ७ स कदाचिदनुप्राज्ञो गत्वानंतशयनं द्विज यत्रासौ जगतां नाथो योगनिद्रामुपाश्रितः ८ तत्र श्रीरमणं देवं संपूज्य विधिवन्नृ
पः मणिमुक्ताहिरण्यैः स्वर्णपुष्पैः सुशोभनैः ९ प्रणम्य दंडवद्भूमौ उपविष्टः स तत्र वै तावद्ददर्श आयांतं विप्रं देवस्य संनिधौ १०
देवार्चनार्थमायांतं तुलसीदलपाणिनं स्वपुरीवासिनं तत्र विष्णुदासाह्वयं द्विजं ११ तत्रागत्य स विप्रर्षिर्देवदेवं जगत्पतिं वि
ष्णुसूक्तेन संस्नाप्य तुलसीमंजरीदलैः १२ तुलसीपूजया मास्य रत्नपूजां पुराकृतां आच्छादितां समालोक्य राजा वचनमब्रवीत् १३
राजोवाच माणिक्यस्वर्णपूजा त्र येणाद्य चेयं मया कृता विष्णुदास कथं तुच्छमाच्छन्नाथ तुलसीदलैः १४ विष्णुभक्तिं न जानासि दरि
कोसि मतो मम यत्त्वया मणिशोभाढ्यां पूजां मम छादयस्यहो १५ नारद उवाच इति तद्वचनं श्रुत्वा सक्रोधः स द्विजोत्तमः राज्ञो
गौरवमुल्लंघ्य जगाद नृपनं तदा १६ विष्णुदास उवाच राजन् भक्तिं न जानासि गर्वितोसि निजश्रिया किंचिद्विष्णुव्रतं तेद्य चीर्णं
पालितं वदस्व तत् १७ राजोवाच इत्थं चेत्कथ्यसे विप्र विष्णुभक्त्यातिगर्वितः भक्तिस्ते रूपते विष्णोर्दरिद्रस्याधनस्य च १८

कार्तिक० मतदानादिकं नैव विष्णुप्रियकरं स्मृतं नापि देवालयं पूर्वं कृतं विप्रलपाकचित् २० इष्टापूर्तं स्थापितेगर्वात् तत्रिब्रह्मभक्तितः स
चक्रांकवति वैष्णवेयज्ञ सर्वे प्रेतादि जोत्तमाः २१ सा सा कारणं हंविष्णो एवच्चाप्यागामिष्यति परंपति सर्वपितृतो भक्तिं सा खादित चादयाप
२९ णाम वृच्चतुः स्वस्युत्कोमहान्पापगच्छन्निजराजगृहंद्विज अस्मिन्देवालयेराजं कृत्वाचार्यं तत्र पुरुले २३ अद्यप्रभृतिप्रसमानुच्छ वसव वहु
दतितां यत्र दुलक्तं न प वैगपान्ते न समर्थितमतं २४ विष्णुदासोपितत्रैवतस्थौ देवालये व्रती पंचैतान्नियमान् कृत्वा विष्णु
प्रियकरान् सदा २५ माघोजीर्वोवृतं सम्यक् तुलसीवनपालनं एकादशीव्रतंजाप्यं द्वादशाक्षरविद्यया २६ उपचारैः षोडशभिर्गी
तवाद्यादिमंगलैः नित्यं विष्णोस्तथा पूजां व्रतान्येतानि सो करोत् २७ नित्यं संस्मरणं विष्णोः गच्छन् तुंजन्मलपन्नपि सर्वभूतस्थि
तं विष्णुं परं सर्वदर्शिनं २८ माघकार्तिकयोर्नित्यं विशेषनियमानपि अकरोदिन्सुतुष्टयैउद्यापनविधिं यथा २९ एवं समारा
ध्यतोस्त्रियः पतितयोश्च चोलेश्वरविष्णुदासयोः अगच्छत्कालं बहुत दूतस्पोतन्निष्ठलंवैद्रियकर्मणोस्तयोः ३० इतिश्री
पद्मपुराणे कार्तिकमाहात्म्ये एकविंशोध्यायः २१ नारद उवाच कदाचिद्विष्णुदासस्य कृत्वानित्यविधिं द्विजः पाकं कर्मौ क
रोत्तावद्धकरत्कोप्यलक्षितः १ तमदृष्टापि सः पाकं पुनर्नैवाकरोत्तदा सायंकालार्चनं स्यसौ व्रतभंगभयाद्द्विजः २ द्वितीयेऽह्नि
ततः पाकं कृत्वा यावत्स विष्णवे उपहाराभिलाचकर्तुं तावत्कोप्यहरत्पुनः ३ एवं सप्तदिनं पाकं कोहरद्द्विजविस्मयः ततः सविस्म
यः सोयमनस्येवं विचारयत् ४ अहो नित्यं ममत्स्य कः पाकं हरते मम क्षेत्रसंन्यासिनः स्थानं नत्याज्यं सर्वथा मया ५ पुनः पा
कं विधायात्र भुज्यते यदि चेन्मया सायंकालार्चनं चेतत्परित्याज्यं कथं मया ६ यदि पाकं विधायैव भोक्तव्यं तु मया तु तत् अ
निवेद्य हरेः सर्वं विष्णवे नैव भुज्यते ७ उपोषितोहं सप्ताहं तिष्ठाम्यत्र व्रतस्थितः अद्यसरं रक्षां सम्यक् पाकं चेन्नकरोम्यहं ८ इति

पाकं विघ्नापानतत्रैवालानिहितः स्थितः तावद्दर्शनचांडालं पाकान्महरसोष्ठितं ११ दृष्ट्वा मंदीनवदनमास्थिचर्मावशेषितं तमा
लोक्य द्विजाग्र्यो मत्कृपयाविष्टमानसः १२ विलोक्यान्महरं विप्रस्तिष्ठतिष्ठेतिभाषतः कथमत्रभवानत्र दुःखं चरतिमेनघ हारिमो ११
विश्राम इत्युक्तं तु वचस्तेनायांत सा विलोक्य च १३ वेगाद्धावन्द्रुतस्त्वा चमहाछित तस्माद्यपातसः भीतं सम्याद्धृतं दृष्ट्वा चांडालं सद्द्विजोत्तम वेगा
द्भयेस्य कृपया वस्त्रोतेरववीजयत १३ अथो स्थितं तमेकं च दद्रष्टात्तत्र किरीटिनं सोऽतीतनारायणं देवं शंखचक्रगदाधरं १४ पी
तांबरं चतुर्बाहुं श्रीवत्सांकं किरीटिनं अतसीपुष्पसंकाशं कौस्तुभोदारभूषितं १५ तं दृष्ट्वा सालिंकेभी वैरावृताद्द्विजसत्तमः स्तो
तुं चापि नमस्कर्तुं तदानालं बभूव सः १६ अथ पराकाद्योदवात्तत्रैवाप्यपुत्तदा गंधर्वोप्सरसश्चापि जगुश्चननृतुस्तदा १७
विमानशतसंवेष्टं देवर्षिगणसंकुलं गीतवादित्रनिर्घोषस्थानं तत्राभवन्नृप १८ ततो विष्णुः समालिंग्य स्वभक्तं सात्विकं त
था सोपुत्रपत्नीकनोरस्वानपदे वैकुंठमंदिरं १९ विमानवरसंस्थाप्य प्राप्यितं विष्णुसंनिधौ दीक्षितश्चालनृपति विप्रदासं दद
र्शह २० वैकुंठभवनं जातं विष्णुदासं विलोक्य सः स्वगुरुं मुद्गलं वेगादाहूयेत्यं वचाब्रवीत् २१ राजोवाच यत्स्पर्द्धयामयाचैतत्य
ज्ञदानादिकं कृतं स विप्रस्स्वयं विप्राप्नोति वैकुंठमंदिरं २२ दीक्षितेनमयासम्यक् कृशरैश्चास्मिन्वैष्णवत्वयं हुतमश्चैकृतान्विप्रादा
ताश्च पूर्णमानसः २३ नैवाद्यापि समे देवः प्रसन्नो जायते ध्रुवं भक्त्यैव तस्य विप्रस्य साक्षात्कारं ददौ हरिः २४ तस्माद्दानैश्च यज्ञैश्च
नैव विष्णुः प्रसीदति भक्तिरेव परं तस्य निदानं दर्शने विभो २५ इत्युक्त्वा भागिनेयं स्वं मभ्यषिंचन्नृपासने आबाल्याद्दीक्षितो यज्ञे
यं पुत्रवत्स्वमगात्ततः २६ तस्मादद्यापि तद्देशात्स दारज्यं समागिनः स्वेच्छायामेव आवसत्तत्कृपावधिवर्तिनः २७ यज्ञवाटं ततो गत्य
यत्कुंडाग्रतः स्थितः त्रिरुच्चैः महाशब्दो विष्णुं संबोध्य वेसदा २८ छित्वा मांसानि हस्ताभ्यां देहान्मनोवाक्कायकर्मभिः हृत्पुकोष्ठा

५

कार्त्तिक पत्तद्रक्षोसर्वेषामेवपश्यतां २९ मुकुन्दस्तुततस्ताःकोश्यागृह्यवामृत्यापठपत्त्वकं ततस्तस्यापितद्राक्षेमुकुंदस्यविशिष्टेवामृ-
तावदाविर्भवद्विष्णुःकोटिसूर्यसमप्रभः तमालिंग्यविमानाग्र्यंसमारोप्यपदच्युतः ३१ तमालिंग्यात्तसामाहस्थंदत्वासौवैकुंठमंदि-
२० रं तेनैवसहदेवेशोगमामचिदृशोहितः ३२ सोविष्णुदासःसतुचोलभूपौ लोयज्ञाललभ्यःसुशीलनामा प्राप्तावुभावुत्तमरूप
भाजौ द्वास्थौकृतौतेनरमाप्रियेण ३३ इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येएकविंशोध्यायः २१ धर्मदत्तउवाच जयश्चविजयश्चै-
वविष्णोर्द्वास्थौत्वयेरितौ किंतुताभ्यांपुराचीर्णंतस्मात्तद्रूपधारिणौ १ गणावूचतुः तृणबिंदोस्तुकन्यायांदेवहूत्यांपुराद्विजकर्द-
मस्यतुदृष्टौचपुत्रौद्वौसंबभूवतुः २ ज्येष्ठोजयःकनिष्ठोभूद्विजयश्चेतिनामतः तस्मामेवाभवत्पश्चात्कपिलोयोगधर्मवित् ३ ज-
यश्चविजयश्चैवविष्णुभक्तिरतौसदा सदाचनियमोजातौधर्मशीलौबभूवतुः ४ नित्यमष्टाक्षरोजाप्यौविष्णुभक्तकरावुभौ सो-
द्योकारंददौविष्णुस्तपोनित्याचैनसदा ५ राज्ञाकदाचिदाहूतौताबुभावथमरुत्तिना जग्मतुर्यत्रकुशलौदर्विणालसवितौ ६ ज-
यस्तत्राभवद्ब्रह्माप्राजकोविजयोभवत् तौयत्नस्यविधिंकृत्स्नंपरिपूर्णंतुचक्रतुः ७ मरुत्तोवभ्रयस्नात्तस्ताभ्यांवित्तंददौबहुत
स्मात्दायतोवित्तंजग्मतुःस्वाश्रमंप्रति ८ यत्रनापपपकुर्विस्तोस्तत्पर्यंतौतदामुनी तद्धनंविभजंतैतौस्पर्द्धौतेचपरस्परं ९ ज-
यत्रवीत्समंभागःक्रियतामितितत्रसः विजयश्चावदात्तत्रयल्लब्धंतस्यतद्भवेत् १० ततोशापःजयःक्रोधाद्विजयंक्रोधमान-
सः गृहीत्वानप्रदास्येनतस्मात्ग्राहोभवेतितं ११ विजयस्तस्यतंश्रुत्वाशापंचैवमशापयत् मदधांताशयत्वंमां तस्मात्त्वंतुगजोभव १२
ततस्ताजग्मतुर्विष्णुंदृष्ट्वानत्वाचतेविभुं शापयोःकारणंबृतौतोयथावाततरमापति १३ जयविजयावूचतुः भक्तावावांकथंदेवयमो-
तेगयोनिंजोभविष्यावः कृपासिंधोतच्छापोविनिवर्त्यतां १४ श्रीभगवानुवाच मद्भक्तयोर्वचःसत्यंमिथ्यानैवभविष्यति सयापि

नाशयत्याकर्तुं शक्यते तत्कदाचन १५ श्रुत्वाद्देववचनात्स्नात्वा मेध्याविमले तो ह्यहं पुरा तयोर्वैरोपशमवाक्येन गातो गर्भेप्यहं किल १६ तस्माद्युवामि
त्यौ नावनुभूय पत्त्वयं कृतौ लभेतां च समं धन्तिन्त्यामित्युक्त्वांतर्दधे हरिः १७ गत्वा तु वृत्तः ततस्तौ ग्राहमातंगौ च कौ छलात्समुद्भवौ कृत्वा वैरिजन्म
कृत्वैव वैकुंठभवनमाप प्रभुः १८ ततस्तौ ग्राहमातंगावभूतां गंडकीजले जातं तस्मैरेनुत दौ त्स्यं मयि विष्णुव्रते स्थितौ १९ कदाचित्स गजः स्नातुं कार्ति
के गंडकीं गतः ग्राहोपि ताव जग्राह संस्मरन् शापकारणं २० ग्राहग्रहितो नागो सो संस्मार श्रीपतिं तदा तावदाविर्भवद्विभुः शंखचक्रगदाप
रः २१ तदा प्रणमति तत्स्थाने हरिर्हैवानितिस्मृतं च चक्रसंघर्षितात्रा ह्यस्मिन् पापात्तौ पिहितौ च्छितौ २२ ताविमौ विश्रुतौ लोके जयश्च विज
यश्च ह नित्यं विमप्रियौ हास्येपप्रैपाद्र तयाद्विज २३ अत्तत्त्वमसि धर्मज्ञोऽनित्यं वैविष्णुव्रते स्थितः त्यक्त्वा मानं सर्वदेवोपि भवत्वत्समः परो
नः २४ तुलामकरमेषेषु प्रातःस्नायी सदा भव एकादशीव्रते निष्ठा तुलसीवनपालनं २५ ब्राह्मणानपि गांश्चापि वैष्णवानां सदा भज म
सूरीक्षारनालैर्वं ताकानपि वै त्यज २६ एवं त्वमपि देहांते नदिसो परमपदं प्राप्स्यसि धर्मदत्त त्वं तत्त्वैव पयावयं २७ धन्योसि
विप्राग्र्य पतत्स्वयैवव्रतं कृतं तुष्टिकं जगद्गुरोः तस्य द्विगामा सफलासु सुरैः पतीपतेपं चारिं येन लोककर्ता २८ नारद उवाच इत्थं धर्म
दत्तं तमुपदिश्य विमानगौ तयोः कलहया सार्द्धं वैकुंठभवनं गतौ २९ धर्मदत्तोप्यसौ जात पत्न्यपत्यच्युतेस्थिते देहांते वैकुंठं च स्थानेभा
र्याभ्यामन्वितो ययात ३० इति हा सामिमं पुराणं वं प्राप्युव तेभ्यो वपतेव पःशु मान् हास्यमानि ध्यकारिणां मति लभते सो कृपया ज
गद्गुरोः ३१ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये त्रयोविंशोध्यायः २३ पृथुरुवाच कृतं त्वयोपाख्यानं तदा यत्समाच्छ्रिधप्रसंगतः पुरा
वल्लीकृष्णारानाल सहानिर्गताः कथिता मया १ प्रभावो यं तयोर्नद्योः किं वा देवत्रयस्य तस्य च तन्मे कथय धर्मज्ञ विस्मयोत्र महामुने २ नारद उ
वाच कृष्णा कृष्णा ततःसाक्षात् तत्पादौ वामहेश्वरः तत्संगमप्रभावं तु नालं वक्तुं चतुर्मुखः ३ तथापि तत्समुत्पत्तिं कीर्तयिष्यामि ते शृणु

कार्तिक० चाक्षुषस्यांतरे पूर्वं मनोर्देवः स्वतंत्रमः ४ सह्याद्रिशिखरे रम्ये यज्ञमाप्याययतोभवत् सकलस्यापरोसंभारान्सर्वेर्देवगणैर्वृतः ५ पुत्रोहरिहरस्याच
तद्विरेः शिवरो यंप्रा भगवान्देपोमुनिगणैर्मुहूर्त्तं ब्रह्मदेवत ६ तस्यदीक्षाविधानायसमाजेतत्र चक्रिरे अथज्येष्ठां सुरां पत्नीं विष्णुरावाहयत्त
दा ७ स्वरानैवायया यावद्गुर्विस्मुवाचह विष्णुस्तथाव नायाति वेत्स्वरांशीघ्रं गायत्र्यत्रविधीयते ८ एवमपि न भवेतस्य भार्याक्रिंउपप
२१ कर्मणि तो नारदउवाच एवमेवहिसद्बापविम्लोधोकजन्मोदितः १० ततक्रुत्वा मगोवीकं गायत्रीब्रह्मणस्तदा निवेश्य दक्षिणेभागेदीक्षा
विधिमथाकरोत् ११ यावद्दीक्षाविधिस्तस्य विधेश्चक्रे विधानतः तावदन्यायिपीतत्र स्वरापरत्तदानृप १२ ततस्तां दीक्षितांदृष्ट्वा गायत्रीं
ब्रह्मणासह सापत्नी दुष्ट्वा स्वरा क्रोधात्स्वरा वचनमब्रवीत १३ स्वरोवाच यथ ज्यापरपरपं ते पूज्यपूजाप्यतिक्रमः जीणात्र प्रवर्त्तते दु
र्भिक्षं मरणं भयं १४ ममासने कनिष्ठेयमवाद्भिः सन्निवेशिता तावत्सर्वे जडीभूतानदीभूयाभविष्यथ १५ इयं चदक्षिणेभागे ह्युपविष्टा
ममासने तस्माल्लोकैः सदाद्रुष्याततनुरूपाश्रुनिम्नगा १६ नारदउवाच ततस्तच्छापमाकर्ण्य गायत्रीकंपिताधरा समुत्थायवरारोहेवेदधीप
मारणापिता स्वरां १७ आरूढपश्रुवाच तवमनोयथा ब्रह्मासममाप्यभर्त्तायथावेत्सु त्वमपि तथैवं मां यस्मात्त्वमपि निम्नगा १८ नारदउवाच
तेतोहास्यकृतास्सर्वे शिवविष्णुमुखास्सुराः प्रणम्यदंडवद्भूमौ स्वरां तत्रविजिज्ञपुः १९ देवाऊचुः देविसर्वे वयं शापावयोर्ब्रह्मणस्त्वयाधुना
यदि सर्वे जडीभूतामविष्यामोऽत्रनिम्नगाः २० तदालोकत्रयंस्येतद्विनाशं यास्यति ध्रुवं अविवेकः कृतस्तस्माच्छापोयं विनिवर्त्यतां २१
स्वरोवाच नाचिंतोविधिगणाध्यक्षोपत्ताहोमत्सुरोत्तमाः तस्माद्विधेः प्रमत्तत्वंनमत्कोपजमिदं खलु २२ नापि मद्वचनं स्येतदसत्यं
त्वजायते तस्मात्स्वांशैर्जडीभूतायूयं भवत निम्नगाः २३ अथवामपि शपत्यो च स्वांशान्यामापि निम्नगे भविष्यंचात्रमोदेवाः पश्चि
माभिमुखाबहे २४ नारदउवाच इतितद्वचनं श्रुत्वा ब्रह्माविष्णुमहेश्वराः जडीभूतामवन्नाद्याः स्वांशैर्देवास्तदानृप २५ तत्रकृष्णाह्य

भक्त्या कृष्णावेण्यायै वो महेश्वरः ब्रह्मा ककुद्मिनी गंगा पश्चाद्वै बभूवतुः २६ देवानामपि चान्सर्वान् जडीभूत्वा व्यवस्थिताः सह्याद्रिशिखे
रे स्नाताः पश्यगाः संतु निम्नगाः २७ परहस्तेन दानाद्यः कुर्वतः पुण्यकर्मिणः विना भक्त्या कृष्णत्रायाः कर्त्ता पश्चार्धभागभवेत् २८ देवौ शैःपूर्व
वाहिन्यौ बभूवतुः पश्चिमा वहाः सपत्न्यौ शैः पंचकूतत्र शतशो यत्र हलशः २९ आपश्रीसुतात्तत्र पतेहरिहरावुभौ महाबलाति बलिनौ नौ
म्नादेवौ बभूवतुः ३० तयोर्नद्योस्तु माहात्म्यं नाहं वक्तुं समो नृप पञ्चक्रोशादपो देवाः स्वांशैस्तिष्ठंति चापगाः ३१ कृष्णोद्भवपापहरं प
रं यः शृणोति पठेच्छ्रावयते च भक्त्या स्यात्तस्य पुण्यपापाणां कलानि पापि तद्दर्शनं स्नानगमोद्भवं फलं च ३२ इति श्रीपद्मपुराणे कार्तिक
माहात्म्ये चतुर्विंशोध्यायः २४ श्रीकृष्ण उवाच इति तद्वचनं श्रुत्वा पृथुर्विस्मयमानसः संपूज्य नारदं भक्त्या विससर्ज तदा प्रिये १ तस्मादुत्त
मं ह्येतन्मासानां च प्रियंकरं माघकार्तिकपालतं तस्ये वैकादशीव्रतं २ वनस्पतीनां तुलसी मासानां कार्तिकप्रियः एकादशी तिथीनां
च क्षेत्राणां द्वारिका मम ३ एतेषां सेवनं यस्तु करोति नियतेंद्रियः सम वल्लभतां याति न तथा यज्ञनादिभिः ४ पापिनामनघं तेषां कवियाणि
यमादपि एतेषां सेवनं कांते कुर्वतां मत्प्रसादतः ५ सत्योवाच विस्मापनीयं तन्नाथ यत्त्वया कथितं मम परदत्तेन पुण्येन कल हस
ति मामता ६ इत्थं यमा वामासो यं कार्तिकस्तेप्रियंकरः स्नानदानादि पापानि स्नानदानेगतानि पत्तं ७ दत्ते च बहुमते पुण्यं तस्य रण
कर्तेविभो अदत्ते केन मार्गेण लभते वा न वेति वा ८ श्रीकृष्ण उवाच अदत्तान्यपि पुण्यानि पापानि च यथा नरैः प्राप्यते कर्मिणोऽपि
न तथ्यथा वत्त्रिशामय ९ देशग्रामकुलानि स्युर्भोगभाजि कृतादिषु कलौ तु केवलं कर्ता फलभुक् पुण्यपापयोः १० अकृतेपि हि सं
सर्गोक्ववस्थेयमुदाहृता संसर्गात्पुण्यपापानि यथायांति निबोध तत् ११ एकत्र मैथुनाद्यानात्सादेकपात्रस्थ भोजनात् फलार्धं प्रा
प्नुयान्मर्त्यो यथावत्पुण्यपापयोः १२ अध्यापनाध्यापनाद्यैकपंक्त्याशनादपि तुर्यांशं पुण्यपापानां नित्यं प्राप्नोति मानवः १३

कार्तिक० दर्शनात्स्पर्शनाध्यानात्तथैव परस्य पुण्यपापानां शतांशं प्राप्नुमान्नरः १४ परस्य निंदापैशुन्यं धिक्कारं च करोति यः तत्कृतं पातकं
प्राप्य स्वपुण्यं प्रददाति सः १५ कुर्वंतः पुण्यकर्माणि सेवायः कुरुते नरः पत्नीभृत्या ऋते शिष्यो यो शिष्यो भृत्या ऋते पि सः कोपि मानवः १६ त
२२ स्य सेवानुरूपेण तत्पुण्यस्य फलभाग्भवेत् एकपंक्त्या स्थितानां यस्तु लंघयन्परिवेषयेत् १७ तस्य पापं षडंशेन तु लभेद्वै पारिवेषतः स्नानं संध्यादि
कं कुर्वन्यः स्पृशेदथवा भाषते १८ स कर्मपुण्यषष्ठांशो ददात्यस्मै सुनिश्चितं धर्मोद्देशेन यो द्रव्यं स्पर्शं याचते नरः १९ तत्पुण्यकर्मजं तत्
स्य धनदः प्राप्नुमात्यफलं नापुण्यात्पापकर्मणां पत्नुपरस्वापहारिणेनरः २० धनात्तस्य पुण्य मादत्ते स्वधनस्यान्यरूपतः विद्धि द्वयं नमता च पश्चा
पकारणपदः २१ वलेनकृत्यापि यदा प्राप्नुयात्पुण्यपापयोः परहस्तेन दानादीन्कुर्वंतः पुण्यकर्मिणः २२ विनाभृत्यकयोः सम्यक्कर्ता
षष्ठांशभाग्भवेत् प्रजाभ्यः पुण्यपापानां स षष्ठांशमुद्धरेत् २३ स्त्रियाऽपुरुषः स्त्रियाभर्तुः पिता पुत्रात्तथैव च स्वपतेर्पि पुण्यस्यार्धं
समवाप्नुयात् २४ वित्तस्यानुचरो ताशांशं हृतेते तु विकारिणी श्रीकृष्ण उवाच इत्थं ह्यदत्तान्यपि पुण्यपापान्याप्नोति नित्यं परसंचिता
नि अतपुच्छा धामिन्निति समनुग्रह पुराणमवं पुण्यमतिश्च २५ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये पंचविंशोध्यायः २५ श्रीकृष्ण उ
वाच पुरावंतीपुरे वासी विप्रो धनेश्वरः ब्रह्मकर्मपरिभ्रष्टः पापनिष्ठः सदुर्मतिः १ रसकंबलचर्मादेः समस्त्यान्नृतवर्तकः स्ते
यवेश्यासुरापानं द्यूताद्यैः सकृमानसः २ देशाद्देशांतरं गच्छन्क्रयविक्रयकारणात् पर्यटंश्च प्रकटभातिनर्मदा पापनाशिनी ३ मा
हिष्मतीं पुरीं प्राप्तः कदाचित्स धनेश्वरः माहिष्वते नकृतापूर्वं तस्यान्माहिष्मतीहिसा ४ कार्तिकव्रतिनस्तत्र नानाग्रामागतान्नरान्
स ददर्शाखिलान्मासमेकमुवास ह सनिम्नगमदतीरे भ्रमविक्रयकारणात् ददर्श ब्राह्मणान्स्नातान्नपोतान्नयदेवार्चनेरतान् ६ कां
श्चित्पुराणान्वाचतः कांश्चित्तत्श्रवणोरतान् नृत्यगायनवादित्रविष्णुस्तवनतत्परान् ७ विष्णुमुद्रांकितान्कांश्चिन्मालातुलसि

धारिताः दृष्टौ कौतुकाविष्टौ तत्र तत्र धनेश्वरः ८ सापि निःस्पृहमनसा तत्र दर्शनस्पर्शनाभावतः वैष्णवानां तथा विष्णोर्नामश्रवणमालभत ९
एवं क्षमासाधिता सापि कार्त्तिकोद्यापने विधौ क्रियमाणेऽदर्शिता मतैर्गोगरतां हरेः १० पौर्णमास्यां तथा पश्यन् विधिं सपूजनादिकं
ददर्शिता भोजनार्थं च दीपदानं च तेन स्थितैः ११ ततः कालेन येन च दीपोत्सवविधिं तत्याः क्रियमाणोऽदर्शि सौधौत्यर्थे तत्र पुरस्थितः १२ त्रि
पुरारेः कृतोद्वाहायतनस्थाः स्थानीये वने तु मृतस्तु क्रियते तस्यां तिथौ मेते मेहोत्सवे १३ मम हृद्रस्य यः कश्चिद्दंतरं परिकल्पयेत तस्य पु
ण्यत्रिः पापमेव निष्कलाः स्युर्नरोत्तमयः १४ तेन सत्यादिकं पश्यन् वधाम मत्पथे नेश्वरः तावत्केल हि नारङ्गो विकलः स पपात ह १५
जनात्तु पतितं वीक्ष्य पारिवत्कुः कृपान्विताः तुलसीमिश्रितं स्नापयेत्तन्मुखं चिद्दिपुत्तदा १६ ग्रपदेहे परित्यक्ते तं च ध्यायन्मां किंक
राः वैजयन्तिकसाद्या मेः निन्युः संयमनीं हृदा १७ चित्रगुप्तस्तु तं दृष्ट्वा निर्भत्स्याविदयंस्तदा यमायतेन बालत्वात्कमर्जं दुःकृ
तं कृतं १८ चित्रगुप्त उवाच नैवास्य ददृशे किंचिद्दावाल्यात्सुकृतं क्वचित दुःकृतं शाकृतं तेव तत्तु वर्षाणामपि भास्करेः १९ पापमू
र्तिरयं दुष्टः किमयं छाद्यते विभो तस्माद्दाकल्पमप्यादं निरयेऽपरिपच्यतां २० श्रीकृष्ण उवाच निशम्येवं वचः क्रोधाद्वर्मः प्राहस
किंकरान दर्शयन्नायमनोहरं पंकालानिसद्दशप्रभं २१ यम उवाच भोभोः प्रेतानयत्वेनं वध्यमानं समुद्धरैः कुंभिपाके क्षिपत्वा
मुदुःखं कल्मषनाशनं २२ ततो समुद्यनिर्भिन्नं मर्दितं प्रेतकोनयन् कुंभिपाके क्षिपत्सायते लयं च तयैव च २३ यावत्तिप्रस्तु
तत्रासौ तावद्वह्नितोऽन्तितोऽपिपो कुंभीपाके ततो वह्निः प्रह्लादत्तमोत्सुरा २४ तं दृष्ट्वा महदाश्चर्यं प्रेतपो विस्मयान्विताः वेगादा
गत्य तत्सर्वं यमायावेदयंस्तदा २५ यमस्तु कौतुकं दृष्ट्वा प्रेतैर्यच्च निवेदितं प्राकिमेतादति प्रोक्तं तमाह पापवादयत २६ ता
वदभ्यायपयातत्र नारदः प्राहसत्वरं यमेन पूजितः सम्यक् तं दृष्ट्वा वाक्यमब्रवीत २७ नारद उवाच न चायं निरयान्मोक्तुं यम

कार्तिक सवित्तनंदन तस्मात्त्वं तस्मै पातं जानामि भगवन्विभो २८ यः पुण्यकर्मणां कुर्याद्दर्शनं चैव भाषणं तदंशमाप्नोति पुण्य
स्यानियतं नरः २९ अससंख्यातैस्तु संसर्गं कृतवानेष तद्वरः कार्तिकव्रतिभिर्मासं तस्मात्पुण्यांशभागयं ३० परिचर्यां करोन्मासं
२३ संपर्कश्चैतिषु न्यभाक्कृतस्तस्याजित्रतं पस्तां पुण्यसंख्या न विद्यते ३१ कार्तिकव्रतिनां पुंसां पातकानि महान्त्यपि नाशं यान्त्यपि
सर्वाण्यपि विनश्यंति सर्वेषां ३२ प्रेतत्वमन्यदात्तं येस्तुल मिश्रितैः स्वयं वै सर्वे तु नापि तौ यस्तु श्राविताहरिनाम च ३३ तस्मा
न्निहत्य पापौघं सकृति प्राप्नुमर्हसि वैष्णवानुग्रहात्तोसौ निरयेन वपच्यते ३४ अथ दृष्टे स्त्वयापापैर्नरये भोगसंनिधिं प्राप्य
तं सुकृतैस्तद्दत्तं पापं प्राप्नोति वै तथा ३५ तस्माद्दर्शनयुक्तोपायं पत्नीपाणिप्रापितोऽपि यं विलोक्य निरयान्सर्वान्पापभोगप्रदाय
कान् ३६ श्रीकृष्ण उवाच इत्युक्ते भगवान् तीनां देवेशोर्गितनिर्णयकाम्यं बलाद्विमुक्तस्तस्यकर्मा तं विप्रं पुनरन्यत्तत्स्व किं करोत्
तानसर्वांन्निरयगणान्प्रदर्शयिष्यन् ३७ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये षड्विंशोऽध्यायः २६ श्रीकृष्ण उवाच ततो
धनेश्वरं नीत्वा निरयान्प्रेतपोऽब्रवीत् दर्शयिष्यंस्ततान्सर्वान्महानुशाकरस्तदा १ प्रेतप उवाच पश्यैतान्निरयान्घोरान्य
न्यस्मिन्महाभयान् येषु पापकरा नित्यं पच्यंते यमकिंकरैः २ तप्तवालुकनामायं निरयो घोरदर्शनः पश्यन्निपत्य दह्यान्तु
अंगदंतेपर किंकरैः ३ अतिथीन्वैश्वदेवेति ह्युत्तमा नागतान्नये पूजयंति नरा तेहि पच्यंते स्वेन कर्मणा ४ गुर्वग्निब्राह्म
णान्गाश्च देवान्मूर्द्धाभिषिक्तकान् तान्निभज्यन्ति ति निदर्श्यापसितानीमे ५ सोऽयं ति पदागांश्चैतन्निदर्श्यांधपोस्मि
मे खड्गदस्त्वर्थान्योनानापापैः प्रपद्यते ६ तथैवान्ते धत्ताम श्रावादं तो यान्ति यो महान्परपत्न्याम तैर्देहोमिथ्यं ते पा
पकर्मिणः ७ अभिनिर्यायरवक्रेश्च तैयवेजंतवः आत्मसावयं स्थितः ८ दर्शयिष्यन्पुनस्त

पच्यंते पंचपापिनः ९ परदारेषु ये जन्तास्ते पच्यंते पापकर्मिणः तृतीयः कूटकः चोक्तस्तेषु निरयो घोरदर्शनः १० यत्रैते कूटकर्मिणः १

पच्यंतमुवाचततो द्विजं परमर्मभिदा मत्स्याः पच्यंते पापकर्मिणः असिपत्रवनाख्येयश्च चतुर्थप्रकारो यमास्थितः ११ पत्नीपुत्रादि
भिर्ये वै वियोगं प्रापयंति हि ६ छेदनैर्यैर यमदूतैः पच्यंते ते इमे नराः १२ असिपत्रैः छिद्यमानाः कूटकर्मोत्थपापकालिताः तप्यंते
पापिनः पंचमं कं दमानाहतस्ततः १३ अर्गलाख्यो महाघोरो चतुर्थो निरयो ह्ययं यत्र नानाविधैः पाशैः बद्धा यमकिंकरैः
१४ मुद्गरैर्बध्यमानाश्च क्रंदंते तेषु पापिनः स्वजनान् ब्राह्मणान् गांश्च निघ्नंती ह ये नराः १५ कचग्रहादयैते पापाः पच्यंते यम
किंकरैः असावशिह मुद्गरैर्वधबंधादिभिः स्थितः १६ कूटशाल्मलिनामाख्यो निरयः षष्ठ एव स यत्रांगारनिभा एते शाल्म
ल्यो ह्यास्थिता द्विज १७ यत्र घोटाभिपच्यंते पातनाभिरिमे नराः परदारपरद्रव्यपरनिंदारताः सदा १८ अग्निदागरदा
गरदा घ्नंता पच्यंते शाल्मलीवने रक्तपूयाभिधं पश्चमं षष्ठं निरयमुद्धृतं १९ अधोमुखाविपच्यंते पातनाभिरिमे नराः श्रम
हमत्तकानिंदायेश्च्रूतामिरताश्च ये २० मज्जमानावध्यमनाः क्रंदंते भैरवस्वनाः घरप्रकारोत्तिष्ठं प्याघेत्सावपिचसंस्थि
तः २१ कुंभीपाकः सप्तमोयं निरयो घोरदर्शनः घोटतैलादिभिर्द्रव्यैः धीनेश्वरविलोकय २२ महापातकिनोयत्रपच्यंते य
मकिंकरैः वहून्यब्दसहस्राणि सान्मज्जनानिमज्जने २३ चत्वारिंशान्मितान् व्याघ्रकान् परपरोरवान् अकामात्पातकं । नेता
श्च यत्कामादर्द्धमुदाहृतं २४ आर्द्रशुष्कादिभिः पापैः त्रिःप्रकारान् व्यवस्थितान् चतुरशीतिसंख्याकैः पापभेदैर्व्यवस्थिता
न् २५ पंचप्रकीर्णकं मपात्कं यं मलिनीकरणं तथा जातिभ्रंशकरं तद्वदुपपातकसंज्ञिकं २६ अतिपापं महापापं सप्तधा पातकं
स्मृतं ताभिः सप्तभिः पच्यंते निरयेषु यथाक्रमं २७ कार्तिकव्रतिभिस्तस्मात्तेषां सर्वेषां क्षयं भवत्यव तस्मात्पापचयाद्दत्ते निर्जितानि
रपाल्ल्वया २८ कार्तिकव्रतिभिस्तस्मात्तेषां सर्वेषां क्षयमवतद्दा यस्मात्पापचयेनाम्र नरकालंनिवर्तितः २९ श्रीकृष्ण उवाच

कार्तिक० दर्शयित्वानुनिर्याता प्रतापस्तमथाहरत् ध्यानेश्वरं परं लोकं पश्चात्स्या मसतत्क्रमि ३० धर्मदत्तस्तु यानाख्यं ध्यानपदेतिपः
स्मृतः तदा व्याघ्रकुलोत्थौ मया चाभ्यां समाचिपः ३१ एवं प्रभावः खलु कार्तिकाख्यं भक्ति कदा मुक्तिकरश्च पश्चात् प्रयाति
२५४ ते कार्तिकपातकानि व्रतस्य संदर्शनतोपि मुक्तिं ३२ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये सप्तविंशोऽध्यायः २७ सूत उवाच
इत्युक्त्वा वासुदेवोपि सत्यभामासहितस्तदा सायंसंध्याविधिं कर्तुं जगाम जननीगृहं १ एवं प्रभावः प्रोक्तोयं कार्तिकः पापना
शनः यं श्रुत्वा प्राप्यते पुंभिः सालोक्यादि चतुष्टयं २ हरिजागरणं प्रातःस्नानं तुलसिसेवनं उद्यापनं दीपदानं व्रतान्येता
नि कार्तिके ३ पंचभिर्व्रतकैरेभिः संपूर्णः कार्तिके व्रती फलमाप्नोति यत्प्रोक्तं भुक्तिमुक्तिफलप्रदं ४ ऋषय ऊचुः विष्णुप्रि
याति फलदः प्रोक्तोयं रोमहर्षणः विष्णोर्भक्तिश्च कपितामहदेवेन संयुता ५ कार्तिकस्य विधिः सम्यक् सूत हासातिवि
स्तृतः धृ अवश्यमेव कर्तव्यः पापदुःखविनाशकृत् ६ सोदाविभिर्निरैः सम्यक् भोगकामैरथापि वा उपस्थितो यदा कश्चि
त् व्रतस्य शक्तिवर्जितः ७ दुर्गारण्यस्थितो वापि व्याधिभिः परिपीडितः कथं तेन प्रकर्तव्यं कार्तिकव्रतकं शुभं ८ पला
दत्यं तत्फलदं न त्याज्यं सर्वयत्नतः सूत उवाच एवमापद्गतो यस्तु नरो नित्यं दृढव्रतः ९ कार्तिकव्रतकं तेन कर्तव्यं तु पयाम
वेत् तत्सर्वं कपयित्वा हरेः ग्रयं मुनिपुंगवाः विष्णोः शिवस्य वा कुर्याद्देवालये हरिजागरं ११ शिवविष्णुगृहाभावे सर्व
देवालयेष्वपि दुर्गारण्ये स्थितो यस्तु यदि वापद्गतो भवेत् १२ कुर्यात्तदाश्वत्थमूले तुलसीनां वनेष्वपि विष्णुनामप्रबं
धाश्च या गायेद्विष्णुसंनिधौ १३ वैसवानां प्रसंगाश्च गायनादिह्नि संनिधौ गोसहस्रप्रदानस्य फलमाप्नोति मानवः १४ वा
द्यकृत्पुरुषश्चापि वाजपेयफलं लभेत् सर्वतीर्थावगाहोत्थं न ~~लमेत्सवितानिलकमा~~ः तेषां फलमाप्नुयात् १५ सर्वमेत

ताते मे त्रिपुरांत तेषां मोक्षो भवेत् तदा अश्वत्थदर्शनाद्वापि तत्प्रवेशं समाप्नुयात् १६ अपराधो यत्तु पाप्येत तेन लभेद्वापि तापसाः व्याधि
तो वा पुमान्कुर्याद्द्विष्टानां समुपार्जनात् १७ उद्यापनविधिं कर्तुमशक्तो यो व्रते स्थितः ब्राह्मणान्भोजयेच्छक्त्या व्रतसंपूर्तिहेत
वे १८ अश्वत्थरूपिणो विष्णोर्वटरूपं ब्राह्मणोभवि तत्सेवाद्यास्तत्सेतुवः सर्वदास्यान्नेशंशयः १९ अशक्तो दीपदानेन यः परदीप
प्रबोधयेत् तेषां वा रक्षणं कुर्याद्वातादिभ्यः प्रयत्नतः २० अभावे तुलसीनां च पूजयेद्वैष्णवं द्विजं यस्मात्संनिहितो विष्णुः स्व
भक्तेष्वेव सर्वदा २१ सर्वाभावे व्रती कुर्याद्ब्राह्मणानां गवामपि सेवामश्वत्थवटयोः व्रतसंपूर्तिहेतवे २२ ऋषय ऊचुः कथं त्व
याश्वत्थवटौ गोब्राह्मणसमौ कृतौ सर्वेभ्योपि तरुभ्यस्तौ कस्मात्पूज्यतमौ स्मृतौ २३ सूत उवाच अश्वत्थरूपी भगवान्विष्णु
रेव न संशयः रुद्ररूपो वटस्तद्वत्पलाशो ब्रह्मरूपधृक् २४ दर्शनस्पर्शनं सेवा तेषां पापहरा स्मृता दुःखापद्व्याधिदुष्टानां
विनाशकारणं ध्रुवं २५ ऋषय ऊचुः कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः एतत्कथय सर्वं नः संशयोस्ति महानिह २६ सूत
उवाच पार्वतीशिवयोर्देवैः सुरतं कुर्वतोः किल अग्निर्ब्राह्मणवेषेण प्रेषितो विघ्नकृत्ततः पुरा २७ ततस्तु पार्वती क्रुद्धा शशाप त्रिदि
वौकसः रतिसौख्यसुखभ्रंशात्क्रोधकंपमाना रुषान्विता २८ पार्वत्युवाच कृमिकीटादयोप्येते जानंति रतिजं सुखं तद्विघ्नकारिणो देवा
अस्युद्भिजत्वमवाप्स्यथ २९ सूत उवाच एवं सा पार्वती देवान् शापक्रोधाद्भ्रमान्सा तस्मात्ते देवा वृक्षत्वमापन्नाः सर्वे देवगणाः कि
ल ३० तस्माद्धि मे विष्णुमहेश्वराद्याः द्रुमा बभूवुर्विधिवैदा मुनीश्वराः यत्र तत्र गवाक्षा किंतु न वहरूपस्पृताम केसरद्विपाः
तात् ३१ इति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमाहात्म्ये अश्वत्थवटकथनं नाम अष्टाविंशोध्यायः २८ ऋषय ऊचुः अश्व
त्थैकस्य जातः सप्ते वाच्छितः स्वरूपस्य कर्ता त्वं विनेकथं प्राप्यः तत्कथं शनिवासरे १ सूत उवाच समुद्रमथनाद्यानि रत्नान्यापुः
सुरा तमाः श्रियं तु कौस्तुभं ते वां विष्णवे प्रददुः सुराः २ यावद्गीकर्तुं तां लक्ष्मीं भार्यार्थमात्मनः तावद्वितापयामास ल

कार्ति. दृष्ट्वा तं चक्रपाणिनं ३ लक्ष्मीरुवाच अस्मत्कुले त्वकथं ज्येष्ठां कनिष्ठा परिणीयते तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन ४
विवाह्यात्र मां पश्चादेष धर्मः सनातनः सूत उवाच इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः ५ उद्दालकाय मुनये सुदीर्घतप
२५ से तदा ग्राम्यवाक्यानुरोधेन तामलक्ष्मीं ददौ किल ६ स्थूलास्यां शुभ्रदशनां जरतीं विभ्रतीं तनुं विततां रक्तनयनां रूक्षपिङ्ग
शिरोरुहां ७ स मुनिर्विष्णुवाक्यात्तामंगीकृत्य स्वमाश्रमं वेदध्वनिसमायुक्तः मानयामास धर्मवित् ८ होमधूमसुगंधाढ्यं वेद
घोषनिनादितं आश्रमं स्वमालोक्याप्यतीसा च वीदिदं ९ ज्येष्ठोवाच नहि योग्योऽनुरूपोऽयं वेदध्वनियुतो मम नात्रागमि
ष्यामो ब्रह्मन्न मत्स्थानं त्वमाश्रमं ध्रुवं १० उद्दालक उवाच कथं त्वं पापासि किं चात्र वर्तते संशयं तत्र तव योग्याऽपावसति का मे वेच वद
तत ११ ज्येष्ठोवाच वेदध्वनिर्भवेद्यस्मिन्नतिथीनां च पूजनं यज्ञदानादिकं चापि नैव तत्र वसाम्यहं १२ परस्परानुरागेण दं
पत्यं यत्र वर्तते पितृदेवार्चनं यत्र नैव तत्र वसाम्यहं १३ उत्तमा नीतिकुशला धर्मयुक्ताः प्रियंवदः गुरुदेवार्चनं यत्र नैव तत्र व
साम्यहं १४ गृहिणीशं गृहे यत्र दंपत्योः कलहो भवेत् निराशा यान्त्यतिथयस्तस्मिन्स्थाने रतिर्मम १५ वृद्धोदरस्तापवत्र पर
द्रव्यापहारिणः परदाररता यत्र तत्र स्थाने रतिर्मम १६ वृद्धसज्जनविप्राणां यत्र स्यादपमाननं निष्ठुरं भाषणं यत्र तत्र स
वसाम्यहं १७ सूत उवाच इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत् उद्दालकः पुनर्वाक्यं सा विह्वलमना विचार १८ सा गच्छ
स्वाश्रमं तत्र पूजामालोक्य सायुर्वीक्ष नायामीति ततः सापि मनसेदर्तसात्भवत् १९ उद्दालकस्ततो वाक्यं मम लक्ष्मीम
वोचत् २० उद्दालक उवाच तावदश्वत्थमूले त्वं स्थिरा तिष्ठ भव स्थिरं यावत् स्थानं समालोक्य पावदायाम्यहं पुनः २१ सूत
उवाच इति तां तत्र संस्थाप्य जगामोद्दालकस्तदा प्रतीक्षती चिरं तत्र यावत्तं न ददर्श सा २२ तदा रुरोद करुणं भर्तृदुःखेन दुः
खिता तस्या रुदितं श्रुत्वा वैकुण्ठभवने श्रियोऽत्ता २३ तदा विह्वलपदा सा सविष्णुरुद्विग्नमानसा लक्ष्मीरुवाच मेऽग्रामिन्

मे भगिनि जपेष्वाम ति त्यागेन दुषिता २४ तामाश्वासयितुं पाहि कृपालो पद्म्यहं प्रिया सूत उवाच लक्ष्म्यासहतेनाविष्णुस्त
त्रागच्छत् कृपानिधिः २५ आश्वास्य पतद्वा लक्ष्मीमिदं वचनमब्रवीत् विष्णुरुवाच अश्वत्थस्त्वद्रूपमाश्रित्य सदा लक्ष्मीः स्थि
रा भव २६ ममांशसंभवो ह्येष आवासस्तु मया कृतः प्रत्यहं ये च पिप्पलं तीर्थं तां ये पूजयिष्यन्ति गृहधर्मिणः २७ तेष्वेवं श्रीकनि
ष्ठा ते भगिनी निश्चला स्तुवै सूत उवाच इत्युक्त्वा भगवान्विष्णुस्तत्रैवांतरधीयत अश्वत्थस्पर्शनं बाह्यहि पिप्पलस्तु दिनं विना
२९ इमां कथां यः शृणुयान्नरो नमो यः श्रावयेद्वापि विशुद्धचेताः स तीर्थराजं बदरीवनं यदुक्तं फलं तत्समवाप्नुयाच्च ३०
रोगापहं पातकनाशकृत्परं सद्बुद्धिदं पुत्रधनादिसाधनं मुक्तेर्निदानं नहि कार्तिकव्रताद्विष्णुप्रियादन्यदिहास्ति भूत
ले ३१ विष्णुप्रियं सकलकल्मषनाशनं च सत्पुत्रपौत्रधनधान्यसमृद्धिकारि ऊर्जव्रतं सनियमं कुरुते मनुष्यः किं तस्य ती
र्थपरिशीलनसेवया च ३२ इति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमाहात्म्ये सूतशौनकसंवादे एकोनत्रिंशोध्यायः २९
सूत उवाच इति सर्वं समाकर्ण्य सत्राजित्सुता तदा हरेर्वाक्यं महाभागा सत्या वचनमब्रवीत् १ सत्योवाच कार्तिकस्य तु माहा
त्म्यं न श्रुतं विस्तरात्प्रभो सर्वेषामेव मासानां कार्तिकः प्रवरः स्मृतः २ श्रीकृष्ण उवाच साधु पृष्टं त्वया सत्ये कार्तिकव्रत
माहात्म्यं शौनकाय पुरा प्रोक्तं सूतेन सुमहात्मना ३ सूत उवाच शृणु एतां मुनिशार्दूल तत्प्रसोत्तरं शुभं ईश्वरेणोपदिष्टाकं प
च्छते षण्मुखायवै ४ कार्तिकेय उवाच बहूनि पद्मनाभस्य रहस्यानि श्रुतानि च पद्माक्षीर्व्यमानानि बिसंवेन त्वया प्रभो ५ सं
सारसागरदुःखेभ्य उद्धरिष्यं त्वं हरिर्व्रतं तथा मुद्ररतापापकपपरवप्रयत्नतः ६ कार्तिकस्य व्रतं ब्रूहि त्वं न सा बद तांबर येन दुःखा

शुचित्यत्का सत्तरिष्यंति मानवाः ७ फलं वैवस्वधर्मस्य कथयस्व सविस्तरं येन धर्मप्रभावेन पद्मजं हंति वैवस्वं ८ दीपदान
स्य माहात्म्यं मुनिपुष्पस्य मुश्रुतं गोपाचंदन माहात्म्यं तुलस्याश्च तथाप्रभो ९ मालतीपुष्पमाहात्म्यं वारिजानां तथा वद धा
त्रीफलानां माहात्म्यं तथा दमनकस्य च १० केतकीपुष्पमाहात्म्यं नैवेद्यस्य परंतप तांबूलकस्य माहात्म्यं माघस्नानफलं वि
भो ११ फलं ब्रूहि प्रभो शुभं ब्रह्मपत्रेषु भोजनात् नीराजनफलं स्यात् तथा परदीपप्रबोधनात् १२ कुरुक्षेत्रमाहात्म्यं सूतकस्य त
था विभो शालिग्रामस्य माहात्म्यं स्वस्तिकविधानकं १३ दानानां च फलं ब्रूहि परान्नस्य च वर्जनात् पंचभीष्मस्य माहात्म्यं सू
तकस्य तथा विभो १४ कथयस्व सविस्तरात् १५ ईश्वर उवाच साधु पृष्टं त्वया वत्स लोकोद्धारताहेतवे कथयामि न संदेहं तस्मि
न्नास्ति वैदृशः १६ सत्यं त्रेतां च यावत्संतारितो हं न संशयः निष्कलोकं तावेमं तिस्त्वायिपतिष्ठति सर्वदा १७ वैवस्वा वैवस्वं
धर्मं यावद्याति द्विजोत्तमः स सागरमहीदानेन तत्सुरां फलमते तु सः १८ कार्तिकस्य च मासस्य कोटि शानाति नार्हति एकतः सर्व
तीर्थानां सर्वदानानि चैकतः १९ एकतो गोप्रदानानि सर्वयज्ञाः सदक्षिणाः एकतः पुष्करे वासः कुरुक्षेत्रहिमालये २० अ
क्रूरस्य वरे तीर्थे वाराणस्यां च शूकरे एकतः कार्तिको वत्स सर्वदा केशवप्रियः २१ सूत उवाच इत्युक्त्वा मुनिना देवं प्रनदी
कं मुनिमाहरः कार्तिकस्नानमाहात्म्यं कथयामि प्यसविस्तरात् २२ ईश्वर उवाच ब्राह्मं कृतयुगं प्रोक्तं त्रेतायुगं तु क्षत्रियं वैश्यं द्वाप
रं वैश्यमित्याहुः शूद्रं कलियुगं स्मृतं २३ कलौ वत्स मनुष्याणां शैथिल्यं स्नानकर्मणि तस्यापि कथयिष्यामि स्नानं कार्ति
कमाघयोः २४ हयस्य हस्तौ च पादौ च वाङ्मनश्च सुसंयतं विद्यातपश्च कीर्तिश्च स तीर्थफलभाग्नरः २५ प्रातरुत्थाय

पोविप्रः प्रातःस्नायी सदा भवेत् सर्वपापविनिर्मुक्तः परं ब्रह्माधिगच्छति २६ स्नानं चतुर्विधं प्रोक्तं स्नानवद्भिः षडानन वाप
पव्यं वारुणं प्रोक्तं ब्राह्मं दिव्यं तथा स्मृतं २७ स्कंद उवाच स्नानानां च चतुर्णां च लक्षणं वद मे प्रभो यथाविस्नानमात्रेण लभ्य
स्यात्पामि ते गुरो २८ वायव्यं गोरजः स्नानं वारुणं सागरादिषु ब्राह्मं च ब्राह्मणैर्मंत्रैर्दिव्यं मेघांबु भास्करे २९ स्नाना
नां चैव सर्वेषां विशिष्टं वारुणं मतं ब्राह्मणक्षत्रियविट्शूद्राणां नरनारीणां षण्मुख ३० प्रातः सर्वं प्रशंसंति स्नानं कार्तिक माघयोः
स्नातो वै कार्तिके मासि प्राप्नोत्यभिमतं फलं ३१ स्कंद उवाच पुनः प्रोवाच भगवान्महादेवो वृषध्वजः श्रोतरुपसंगम्य भक्ति
युक्तं षडाननं ३२ ईश्वर उवाच कार्तिके वैष्णवं सम्यक् सर्वमासेषु चोत्तमं यस्मिन्मासे त्रयस्त्रिंशद् देवाः संहिता कलौ ३३ उ
र्जे मासि मोहिमाघ भोजनानि द्विजातये तिलधेनुं हिरण्यं च रजतं भूमिवाससी ३४ गोप्रदानेनानि दास्यंति सर्वदानेन सुव्र
तः सर्वेषामेव दानानां कन्यादानं विशिष्यते ३५ ब्राह्मणाय च यः कन्यां दास्यंति विधिवन्नराः वसंति ते चैव कुंठे यावदिंद्राश्च
तुर्दश ३६ सोमकाले तु संप्राप्ते सोमो भुंक्ते तु कन्यकां रजः काले तु गंधर्वाः पावकः कुचदर्शने ३७ तस्माद्विवाहयेत्कन्यां
यावन्नर्तुमती भवेत् विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः ३८ दातव्याः ब्राह्मणायैव श्रोत्रियाय तपस्विने साक्षा
दुर्धितवदाय विधिना ब्रह्मचारिणे ३९ कन्यावरप्रमाणाय दुपतावविधिः स्मृतः यावंति चैव रोमाणि कन्यायाश्च तनौ मुने
४० तावद्वर्षसहस्राणि स्वर्गलोके महीयते सहस्रमेव धेनूनां शतं चानडुहः समं ४१ दशानडुत्समं यानं दशयानसमो हयः
हयदानसहस्रेभ्यः गजदानं विशिष्यते ४२ गजदानसहस्रेभ्यो गोप्रदानं विशिष्यते ४४ गोप्रदानसहस्रेभ्यो भूम्यन्नदानं वि

कार्तिकमा० शिष्यते अन्नाधारमिदं विश्वं जगत्स्थावरजंगमं ४५ तस्माद्देयं प्रयत्नेन कार्तिके शिखिवाहन अन्नानि तुल्यप्रदानानि
अन्नानि तुल्यफलानि च ४६ सर्वकामदुघा धेनुः पृथ्वी च वसुरत्नता कार्तिकेय उवाच अन्नान्यपि महादेव त्वया प्रोक्तानि वक्तु
२७ मर्हसि ४७ यानि कानि च पापानि ब्रह्महत्यादिशो भवेत् सूत उवाच इति पृष्टस्तदा शंभुः पुनर्वक्तुं प्रचक्रमे ४८ यावंति
बहुध्या स्थूलानि स्युः ४०, शृण्वंतु पापघ्नाः ईश्वर उवाच परान्नं वर्जयेद्यस्तु कार्तिके नियमे कृते ४९ परान्नवर्जनाद्वत्स लभे
च्चांद्रायणफलं सांप्रतं कार्तिके दृष्ट्वा परान्नं यस्तु वर्जयेत् ५० दिने दिने तु कृच्छ्रस्य फलं प्राप्नोति मानवः ब्राह्मणेभ्यो महीं
दत्वा ग्रहणे चंद्रसूर्ययोः यत्फलं लभते वत्स तत्फलं भूमिशायनात् ५१ भोजयेद्द्विजदंपत्यो पूजयेच्च विलेपनैः कंब
लानि च रत्नानि वासांसि विविधानि च ५३ तिलकाश्च प्रदातव्या प्रच्छादनपटैः सह उपानदातपत्रं च कार्तिके द्विजन्मा
भिनि ५४ यः करोति नरो नित्यं कार्तिके विप्रभोजनं न दुर्गतिमवाप्नोति यावदिंद्राश्चतुर्दश ५५ सर्वकामफलं तस्य सर्व
तीर्थफलं लभेत् न चापि नरकं पश्येद्ब्रह्मपत्रस्य भोजनात् ५६ ब्रह्मैव पत्रतः साक्षात् नीलाख्यः सर्वकामदः मध्यमं
वर्जयेत्तत्र कार्तिके शिखिवाहन ५७ ब्रह्मा विष्णुश्च रुद्रश्च कपिलापयसस्तथा ५८ प्राशनान्मुनिशार्दूल नरोन
रकमश्नुते अस्नानाद्भुंजते यस्तु शूद्रो वा कपिलापयः ६० कपिलां ब्राह्मणो दत्वा शुद्धो भवति भामिनि तिलदानं न दी
यानि सर्वदा सा पुण्यदर्शने ६१ भोजनं ब्रह्मपत्रेषु कार्तिके मुक्तिदायकं मौनी पलाशमाश्रित्य तिलैर्लोपोसपदामा ६२
कार्तिके हन्ति शापश्च हंति पापं पुरार्जितं जागरं कार्तिके मासि यः करोत्यरुणोदये ६३ दामोदराग्रे सेनानीर्गोसहस्रफ

कोलभेत् पितृपक्षेऽन्नदानेन ज्येष्ठाषाढे तु वारिणा ६४ कार्त्तिके पुष्कलं पुंसां परदीपप्रबोधनात् बोधनात् परदीपस्य
वैष्णवानां च सेवनात् कार्त्तिके फलमाप्नोति राजसूयाश्वमेधयोः ६५ विना स्नानेन कृष्णस्य विष्णोर्वैष्णवानां च सेवनात् न भवेत्
कार्त्तिके यस्तु हरत्युत्तमं पुण्यं दशाधिकं ६६ पुष्करे यः स्मरेत् स्नानं कर्मणा मनसा गिरा कार्त्तिके मुनिशार्दूल लभते कोटिगुणं
व्रत ६७ प्रयागे माघमासे तु पुष्करे कार्त्तिके तथा अवन्तीमाधवे मासे हन्त्याशु पापं युगार्जितं ६८ धन्यास्ते मानवा लो
के कलिकाले विशेषतः ये कुर्वन्ति द्विजे नित्यं पितृपर्वे हरिपूजनं ६९ किं दानैर्बहुभिः पित्रे गयाश्राद्धादिभिर्मुने तारिता
स्तेन पितरो नरकाद्ध्येनं संशयः ७० तोयादिस्नपने विष्णोः क्रियते विष्णुकारणात् कल्पकोटिदिवं प्राप्य वसन्ति त्रिदशैः
सह ७१ कार्त्तिके नार्चितो विष्णुः कमलैः कमलेक्षणः जन्मकोटिषु विप्रेन्द्र नेते यो कमलागृहे ७२ अहो मुग्धाः कथं विष्णो
स्तर्पिततः कलिकुन्दैः ये नार्चिता हरिर्भक्त्या कमलैरसितासितैः ७३ पद्मनैकेन देवेशं योऽर्चयेत् कमलापतिं वर्षायुत
सहस्रस्य पापस्य कुरुते क्षयं ७४ अपराधसहस्राणि तथा सप्तशतानि च पद्मेनैकेन देवेशः क्षमते प्रणमेतितः ७५ तुल
सीपत्रलक्षेण यो वै यत् कार्त्तिके हरिं पत्रे पत्रे मुनिश्रेष्ठ लभते मौक्तिकं फलं ७६ तुलसीगंधमिश्रं यो पार्थिवं विलक्षणं कुरुते मुने
वत्सकोटिसहस्राणि प्रीतो भवति केशवः ७७ तुलसीमुनिशार्दूल न नतस्य स्पृशते कलिः विष्णुभक्तोऽतिनिर्माल्यपादा
ने परिमार्जयेत् ७८ सर्वरोगैस्तथा पापैर्मुक्तो भवति नारद विष्णोर्निर्माल्यशेषं यः प्रयोगस्य हस्ते धारयेत् दुरितानि विनश्यं
ति भ्राम्यते यानि तिर्यक् स्थिताः ७९ शेषा देवं हरेर्भक्त्या निर्माल्यं पादयोर्जलं वेदान्त्य पराशरं दृष्टा हत्यापहारकं ८०

कार्तिकमा० उवाच माघस्नानस्य माहात्म्यं शृणु भागवतोत्तम त्वत्समो नास्ति लोकेस्मिन् विष्णुभक्तो महामुने ८१ चक्रतीर्थे हरिं दृष्ट्वा म
थुरायां केशवं यत्फलं लभते यस्तु माघस्नानेन तत्फलं ८२ जितेंद्रियः शांतमना सदाचाररतो संयुतः स्नानं करोति यो माघे सं
२८ सारान्न पुनर्भवेत ८३ क्ष्मा उवाच शूकरस्य तु माहात्म्यं कथयाप्य प्रभावतः यस्य विज्ञानमात्रेण मानित्यं मम सर्वदा ८४
सूत उवाच इत्युक्त्वा भगवान्विष्णुः सत्यायै बहुभाजनां तदहं संप्रवक्ष्यामि त ८० शृण्वंतु पापघ्नाः ८५ पंचयोजनविस्तीर्णं
शूकरं मम मंदिरं अस्मिन्वसति यो देवि गर्दभोपि चतुर्भुजः ८६ शतानि हस्तसहस्राणि त्रीणि हस्तशतानि च त्रयो हस्ताविशा
लाति परिमाणं विधीयते ८७ षष्ठिवर्षसहस्राणि योन्यत्र कुरुते तपः तत्फलं लभते देवि प्रहरार्द्धेन शूकरे ८८ सलि
हत्याकुरुक्षेत्रे राहुग्रस्ते दिवाकरे तुलापुरुषदानेन यत्फलं पृथि कार्तिके ८९ वाराणस्यां तु गंगायां त्रैपत्यात्फलं भवेत सह
स्रगुणितं गंगायमुनसंगमे ९० अनंतं देवि तत्पुण्यं शूकरे मम मंदिरे अन्यत्र दद्यते लोके सावि धानेन भामिनि ९१ इहैव केन
दत्तेन शूकरे तत्समं भवेत शूकरे चैतयावत्यो गंगासागरसंगमे ९२ सकृद्देव नरः स्नात्वा ब्रह्महत्यां व्यपोहति अलर्कं शाप
रा प्राप्ता सप्तद्वीपवसुंधरा ९३ शूकरक्षेत्रमाहात्म्यं स्तोत्रं कंठ जगामिनि मार्गशीर्षस्य शुक्लायां द्वादश्यां व्रजपत्रिका ९४ स
त उवाच इति वाक्यं समाकर्ण्य ऋषिः पप्रच्छ पार्वती शालग्रामार्चनं भूयस्तत्र प्राप्तं तपोधनाः ९५ इति श्रीपद्मपुराणे उत्तर
खंडे कार्तिकमाहात्म्ये कृष्णसत्याभामासंवादे त्रिंशोऽध्यायः ३० कार्तिक उवाच भगवन् श्रोतुमिच्छामि सर्वे धर्माः श्रुता मया शाल
ग्रामार्चनं ब्रूहि विस्तरेण मम प्रभो १ ईश्वर उवाच साधु साधु महाभाग यन्मां हि परिपृच्छसि तदहं संप्रवक्ष्यामि शृणुष्व मम व

सलं २ शालग्रामशिलायां तु त्रैलोक्यं सचराचरं मया सह महासेन लीनं तिष्ठति सर्वदा ३ दृष्ट्वा प्रणमितं येन स्नापितं
पूजितं तथा यज्ञकोटिसमं पुण्यं गवां कोटिफलं भवेत् ४ छिन्नस्तेन तपा वत्स गर्भवासस्सुदारुणः पीतं येन सदा विष्णोः शा
लग्रामशिलाजलं ५ कामासक्तोपि यो नित्यं भक्तिभावविवर्जितः शालग्रामशिलां वत्स पूजयित्वाच्युतो भवेत् ६ शालग्रामशि
लातोयं हत्याकोटिविनाशनं स्मृतं संकीर्तितं ध्यातं पूजितं च नमस्कृतं ७ शालग्रामशिलां दृष्ट्वा यांति पापान्यनेकशः नमः क
रोति मनुजः शालग्रामशिलार्चने ८ भक्त्या वा यदि वाभक्त्या कलौ भक्तिमवाप्नुयात् वेदवर्त्ते भयं नास्ति न पापं स्याज्जन्मनोः
पः करोति नरो नित्यं शालग्रामशिलार्चनं गंधमाघ्रापनं वेद्यं धूपदीपाविलेपनैः १० गीतैर्वाद्यैस्तथा स्तोत्रैः शालग्रामशिला
र्चनं ११ कुंठितो मानवा यस्तु कलौ भक्तिपरायणाः कल्पकोटिसहस्राणि रमते विष्णुसन्निधौ १२ शालग्रामनमस्कारो भा
वेनापि नरैः कृतः मानुषत्वे तथा तेषां नष्टं कायेन राम भुवि १३ यमदूतस्य वेदपि दृष्टा मत्त्रभेनभमं तिये वासुदेवनते ते पाम
दूताः पापमोहिताः १४ मात्लिंगस्पर्शनं कार्यं नान्या जातिर्विधीयते या हि पिदिपिता विशेषाः सांतिपिमि चल्लभा १५
पत्तानोपवसन्मेर्त्यः सपापाश्वपचाधिकः शालग्रामशिलापात् सदा पुण्यं वसाम्यहं १६ दत्ते देवेन तुष्टेन स्वस्थाने
मम भक्तितः पद्मकोटिसहस्रैस्तु पूजितैर्माधपस्फलं १८ तत्फलं कोटिगुणितं शालग्रामशिलार्चने पूजितो हं
न तेमर्त्यैर्नमिताहं न तैर्नरैः १९ न स्मृतं मर्त्यलोके यैः शालग्रामशिलार्चनं शालग्रामशिलापात् यः करोति मम र्चा
तेनार्चितोहं भो वत्स युगानामेकविंशतिः २२ किं मर्चितैर्लिंगशतैर्विष्णुभक्तिविवर्जितैः शालग्रामशिलाबिंबे नार्चितो

यदि पुत्रक २२ अन्नं हि मम नैवेद्यं पत्रं पुष्पं फलं जलं शालग्रामशिलामध्ये सर्वं याति पवित्रतां २३ भुक्त्वान्यदेवनैवेद्यं
द्विजश्चांद्रायणं चरेत् भुक्त्वा केशवनैवेद्यं कोटियज्ञफलं लभेत् २४ पादोदकेन देवस्य हत्याकोटिसमन्वितः शुद्ध्यंति ना
त्र संदेहः स्पर्शात् खादकेन हि २५ यो हि माहेश्वरो भूत्वा वैष्णवं न च पूजयेत् स याति नरकं यावदिंद्राश्चतुर्दश २६
जेष्ठात्मेनाप्यहं यस्य ब्रह्महत्यामपि विक्रमेत् पितामहा भगान्यश्यामर्त्यमलमोजनाः २७ संसारदुःखकांतारनिमग्नांतिना
यमाः वर्षकोटिसहस्राणि रूपसाराध्यनवर्जिताः २८ सकृदभ्यर्चितैर्लिंगैः शालग्रामसमुद्भवैः मुक्तिं प्रयांति मनुजाः
सांख्ययोगविवर्जिताः २९ मल्लिंगकोटिभिर्दृष्टैर्यत्फलं पूजितैः स्तुतैः शालग्रामेन तद्वत्स्यादेकेनापि हि तद्भवेत् ३० को
टिलिंगसहस्रैस्तु पूजितैर्जाह्नवीतटे काशीवासो युगान्यष्टौ दिनेनैकेन तद्भवेत् ३२ किं पूजयन्ति बहुन्यत्र पूजितो विल्व
कोनरैः नाहं ब्रह्मादयो देवाः संख्यां कर्तुं समीहते ३३ शालग्रामशिलारूपी यत्र तिष्ठति केशवः तत्र देवाः सुरा यक्षाः भुवनं
नि चतुर्दश ३४ सुराणां कीर्तितैः सर्वैः कोटिभिर्यत्फलं भवेत् तत्फलं कीर्तनाद्देवकेशवे स्तुते कलौ ३५ शालग्रामशि
लाग्रे तु श्राद्धं कृतं पितृतर्पिताः वसंति पितरस्तस्य न संख्या तत्र विद्यते ३६ ये पिबंति नरा नित्यं शालग्रामशिलाजलं पंचगव्य
सहस्रैस्तु प्राशितैः किं प्रयोजनं ३८ प्रायश्चित्तैः समस्तैश्च किं दानैः किमुपोषणैः चांद्रायणैश्च चान्यैश्च पीत्वा पादोदकं हरेः ३९
वः करोति तत्र गंगाप्रतिमां जलशायिनो कोटिभिश्चापि किं कार्यमन्यदेवप्रपूजितैः ४० विष्णुलोकान्तु वै देवा ह्यत्र जल्पंति द
वताः अन्यानामस्ति सर्वस्य तु कृतस्य तु पुत्रक ४१ फलं प्रमाणहीनं तु शालग्रामशिलार्चने यो ददाति शिलाविप्राः शालग्रा

मसमुद्भवां ४२ विप्राणविप्लभक्ताय तेनेष्टं क्रतुभिः शतैः गृहेपि वसतस्तस्य गंगास्नानं दिने दिने ४३ सस्नातः सर्वतीर्थेषु
सर्वयज्ञेषु दीक्षितः शालग्रामशिलातोये यो भिषिंचति मानवः ४४ स्वर्गे मर्त्ये च पाताले पाषाणाः संति भूमिजाः शालग्रा
मशिलाग्रावा नास्ति नास्ति पुनः पुनः ४५ मानुष्यं दुर्लभं लोके सफलं तस्य जीवनं तिलप्रस्थं सतं भक्त्या यो ददाति दिने दिने ४६
तत्फलं समवाप्नोति शालग्रामशिलार्चनात् पत्रं पुष्पं फलं तोयं मूलं दूर्वादलं तथा ४७ जायते मेरुणा तुल्यं शालग्रामशि
लार्चने विधिहीनापि यः कश्चित्कलामंत्रविवर्जितं ४८ चक्रांकफलमाप्नोति सम्यक्शास्त्रोदितं फलं यतस्तु वै मपाप
घ्नः केशवः क्लेशनाशनः ४९ तत्सर्वं कथयिष्यामि तव स्नेहेन पुत्रक कथं वा प्रियसे देव तत्सर्वं कथयस्व नः ५१ विष्णुरु
वाच तत्रैव रूपचक्रांते यानि नामानि मे शृणु नारद शोभने चक्रे नोतं स्थापितं यदि ५३ वासुदेवः स विज्ञेयः शुक्लश्चैव तु शो
भनः प्रद्युम्नस्य चक्रं तु नीलदीप्तिस्तथैव च ५४ रक्तपीतिकापत्रद्वारदक्षः पद्मेन चिह्नितः उद्दिष्टं खं विजानीयात् संक
र्षणमिति स्थितं ५५ कामदं मोक्षदं चैव अनिरुद्धं च विशेषतः परमेष्ठी च शुक्लाभः पद्मचक्रसमन्वितः ५६ बिंबाकृतस्तथा
पृष्ठे सरंध्रं चातिपुष्कलं कृष्णवर्णस्तथा विष्णुः स्थूले चक्रे सुशोभने ५७ द्वारोपरि तथा रेखा लक्ष्यते मध्यदेशतः कपिलो
पद्मचक्रस्तु नरसिंहस्तु शोभनः ५८ ब्रह्मवर्ण्यतोपरूपो सो ग्रन्थया विघूर्णा भवेत् वाराहः शक्तिलिंगस्तु चक्रे च विषमे
स्मृते ५९ इंद्रनीलनिभः स्थूलस्त्रिरेखो नामतः शुभः दीर्घकांचनवर्णा या बिंदुत्रयविभूषिता ६० सा मत्स्यशिला
सर्वभुक्तिमुक्तिफलप्रदा कूर्मात्पोन्नतः पृष्ठे वर्तुलावर्तपूरितः ६१ हरितवर्णो माधवे कौस्तुभेन च चिह्नितः हयग्री

ग्राहस्याकारो रेखापंचविभूषितः ६३ वहुविंदुसमाकीर्णो पद्मनालंच स्यर्कं वैकुंठ स सिमिनाम चक्रमेतत्तपाप्यनं ६४
छादो परितपार्श्वे ग्रामाकाराग्रशोभना श्रीधरस्तु तथा देवः शोभितो वनमालया ६५ कदंबकुसुमाकारो रेखापंचविभूषितः
३० वर्तुलश्चातिह्रस्वश्च वामनः परिकीर्तितः ६६ अतसीपुष्पसंकाशः विंदुनापरिशोभितः सुदर्शनस्ततो देवः श्यामवर्णो महा
महाद्युतिः ६७ वामपार्श्वे गदा चक्रे रेखा चैव तु दक्षिणे दामोदरस्तथा स्थूलो मध्ये चक्रं प्रतिष्ठितं ६८ पद्मघातम सेपा
भुक्तिमुक्तिफलप्रदः दूरपतेशिखरो लिंगं शालग्राम समुद्भवं ७० तस्य योगेश्वरो देवो ब्रह्महत्यां व्यपोहति अरक्तं पद्मनाभं
तु पंकजं चक्रसंयुतं ७१ सुवर्णरेखा बहुलं स्फटिकद्युतिशालिने अतिहिरण्याशिवकरी विष्णुः कीर्तिं ददाति च ७२ पांडु
पापहन्ता पीता पुत्रपत्रफलप्रदा नीलाप्रभ छेत्तलक्ष्मीं रक्ता रोगप्रदायका ७३ उत्कीडछदमनी वक्रा दारिद्र्यनाशिनी एके
सुदर्शनं सेव्यं लक्ष्मीनारायणो द्वये ७५ त्रितयं चाच्युतं विद्यात् चतुर्थं च जनार्दनं पंचमे वासुदेवस्य षष्ठे प्रद्युम्नमेव च ७६ संकर्ष
णं सप्तमं च अष्टमं पुरुषोत्तमं नवमं नवव्यूहं दशमं तु दशात्मकं ७७ एकादशं चानिरुद्धं द्वादशं द्वादशात्मकं अत ऊर्ध्वं
तु चक्राणि इह ये अनंतसंज्ञके खंडिते त्रुटिते भग्ने शालग्रामे न दोषभाक् इष्टतेप स्यपाम र्तिः सतांपलेन पूजयेत् ७९ शाल
ग्रामशिलायत्र तत्र संनिहितो हरिः तत्र स्नानं च दानं च वाराणस्याः शताधिकं ८१ कुरुक्षेत्र प्रयागे च नैमिषे पुष्करे तथा ब्रह्मह
त्यादि पापं च यत्किंचित्कुरुते नरः ८२ तत्सर्वं निर्दहत्याशु शालग्रामशिलार्चनं शालग्रामोद्भवो देवो यत्र द्वारावती भवः ८३
उभयोः संगमो यत्र मुक्तिस्तत्र न संशयः ब्रह्मचारि गृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः ८४ नालग्रामे विष्णुनैवेद्यं नात्र कार्या विचा

ह्मणा तस्य पूजनेन मे आश्वनजपेन च भावना । शालग्रामशिलायां तु कुलाब्दलक्षकमाद्दरात् कार्तिके तु विशेषेण पुनात्यासप्तमं कु-
लं ८६ यत्र मंत्रेनुहि पः कुर्यान्मंडलं केशवाग्रतः मन्वंतरशतं यावत्ताकोटिदिवं वसेत् ८७ यस्तु संवत्सरं पूर्णमग्नि-
होत्रमुपासते कार्तिके स्वस्तिकं कुर्यात्समम् एतन्न संशयः ८८ गमनागमने चैव श्रमस्वेदस्य तत्र भोजने ते तत्पापं नाशमा-
याति क्षमापित्वा हरेर्गृहं ८९ मंडलं कुरुते नारी या नित्यं केशवाग्रतः सप्तजन्मनि वैधव्यं न प्राप्नोति कदाचन ९० धा-
त्रीच्छायां समाश्रित्य कुर्यात्पिंडं महामुने मुक्तिं प्रयान्ति पितरः प्रसादान्माधवस्य तु ९२ मूर्ध्नि पाणौ मुखे चैव देहे
च मुनिसत्तम धत्ते धात्रीफलं यस्तु स महात्मा सुदुर्लभः ९४ धात्रीफलविलिप्तांगो धात्रीफलविभूषितः धात्रीफ-
लकृताहारो नारायणसमो भवेत् ९५ यः कश्चिद्वैष्णवो लोके धत्ते धात्रीफलं शुभं प्रियो भवति देवानां मनुष्याणां च
का कथा ९६ धात्रीफलं च तुलसीं मृत्तिकां द्वारकोद्भवां सफलं जीवनं तस्य त्रितयं यस्य वेश्मनि ९७ धात्रीमाला-
कलितो नरः तावद्युगसहस्राणि वैकुंठे वसते नरः ९८ मालायुग्मं वहेद्यस्तु धात्रीतुलसीसंभवं वहते कंठदेशे तु स क-
कोटिदिवं वसेत् ९९ सन्निधाय स्थितं द्विज ग्रामे शालग्रामशिलाचक्रं यस्तु कुर्यान्नरोत्तम तस्य पुण्यं पुण्डरीकाश्वमेधके १०० नृपा-
णां च यथा विष्णुः पुष्पाणां मालती तथा मालत्या तु दिने देवं यो वै पूजयतेऽच्युतं १ जन्मदुःखजरारोगैर्मुक्तो मुक्तिमवाप्नुया-
त् मालतीमालया विष्णुः पूजितो येन कार्तिके २ पापापहरणं तेन मालतीस्फुटसौरिः प्रमार्जति श्रीचंदनं सकर्पूरमगुरुं
वा सकुंकुमं ३ केतकीदीपदानेन सर्वदा केशवप्रिये कार्तिके केतकीपुष्पं दत्त्वा येन कलौ युगे दीपदानेन महासेन कुला

कार्त्तिकमा० नीराजयेत्सुतं ६ केतकीपुष्पनैकेन पूजितो गरुडध्वजः समासहस्रं सुप्रीतो जायते मधुसूदनः ७ अर्चयित्वा हृ
षीकेशं कुसुमैः केतकोद्भवैः पुण्यं तद्भवनं याति केशवस्य पितामह ८ दमनेनापि देवेशं संप्राप्ते मधुमाधवे योऽर्चनात्तस्य
३१ सन्निधौ वत्स अर्चनात्सलभेत फलं ९ अगस्त्यकुसुमैर्देवं अर्चयेत्तु जनार्दनं दर्शनात्तस्य भो विप्र नरकाग्निः प्रशाम्यति १०
विहाय सर्वपुष्पाणि मुनिपुष्पैस्तु केशवं कार्तिके योऽर्चयेद्भक्त्या वाजपेयफलं लभेत ११ मुनिपुष्पकृतां पूजां यो दास्यति
जनार्दने देवेन्द्रोऽपि मुनिश्रेष्ठ कुरुते तस्य सत्क्रियां १२ गवामयुतदानेन यत्फलं प्राप्यते गुरोः मुनिपुष्पस्य चैकेन कार्त्तिके ल
तत्फलं १३ कौसुमेन पत्येऽपि प्रीतिर्या च घनमालया न लक्षदलेन संप्रीतः कार्त्तिके च तथा हरिः १६ सूत उवाच प्रश्न
पावतं दृष्ट्वा कुमारं भक्तितत्परं पुनः प्रोवाच भगवान्महादेवो वृषध्वजः १७ ईश्वर उवाच शृणु दीपस्य माहात्म्यं का
र्तिके शिखिवाहन पितरश्चैव वांछंति सदा पितृगणैर्वृताः १८ भविष्यति कुलेऽस्माकं पितृभक्तः सुपुत्रकः कार्तिके दीप
दानेन यस्तोषयति केशवं १९ घृतेन दीपको यस्य तिलतैलेन वा पुनः ज्वलते सुरसेनानि अश्वमेधेन तस्य किं २० ते
न स्वर्ग्गता मुनिः सर्वैः कृतं तीर्थावगाहनं दीपदानं कृतं येन कार्तिके केशवाग्रतः २१ कृष्णपक्षे विशेषेण यावत्प्रांचयदिनानि त
पुण्यानि तेन प्रदत्तं अद्य ये सर्वकामदं २२ एकादश्याः परे दत्ते दीपं प्रज्वाल्य मूषिका मानुष्यं दुर्लभं प्राप्य परां गतिमवा
पसा २३ लुब्धकोऽपि चतुर्दश्यां पूजयित्वा महेश्वरं निर्दहति परमां प्राप्य विष्णुलोकं जगाम सः २४ श्वपाकोऽपि स्वकर्माद्ध
र्य दीपं प्रज्वाल्य परैः कृतं श्रद्धालीलावतीनाम त्वाजगाम स्वर्गतिं पुनः २५ चतुर्दश्यामावस्यां दत्ते ते प्राप्नुवंति हि अतो यो कौमुदी

नामख्यातातेशिविवाहन १२६ इतिश्रीपद्मपुराणेउत्तरखंडेकार्तिकमाहात्म्येकृष्णसत्यासंवादेएकत्रिंशोध्यायः ३१
सत्योवाच दीपावलिंप्रजानाथ कोमहंब्रूहिमेप्रभो किमर्थंदीयतेदानंतस्याःकादेवताभवत् १ किंचतत्रभवेद्देयंकि
न्नतेत्रममप्रभो प्रहर्षःकश्चनिर्दिष्टःक्रीडाकात्रप्रकीर्तिता २ सूतउवाच इतितस्यावचःश्रुत्वाभगवान्कमलेक्षणः सा
धुताकमलाकांतप्रहसन्निदमब्रवीत् ३ कृष्णउवाच कार्तिकस्यासिते१तेकालेवैवविद्धदपे त्रयोदश्यांदीपदानात्स
मिजप्राप्नुतामिति ५ कार्तिकेकृष्णपक्षेतुचतुर्दश्यांविधूदये अवश्यमेवकर्तव्यंस्नानंनरकभीरुभिः ६ पूर्ववि
द्धाचतुर्दश्यांकार्तिकस्यासितेतरे पक्षेप्रत्यूषसमये स्नानंकुर्यादतंद्रितः ७ तैलेलक्ष्मीर्जलेगंगादीपमालाचतुर्द
शी प्रातःस्नानंहियःकुर्याद्यमलोकंनपश्यति ८ अपामार्गस्तथातुंबीप्रपुंनाटमथापरः भ्रामयेत्स्नानमध्येतु
नरकस्यक्षयायवै ९ सीतालोष्टसमायुक्तःसकंटकदलान्वितः हरपापमपामार्गभ्राम्यमाणःपुनःपुनः १० अ
पामार्गंप्रपुंनाटंभ्रामयेच्छिरसोपरि ततश्चतर्पणंकार्यंधर्मराजस्यनामभिः ११ यमायधर्मराजायमृत्यवेचांत
कायच वैवस्वतायकालायसर्वभूतक्षयायच १२ औदुंबरायदध्नायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्र
गुप्तायतेनमः १३ नरकायप्रदातव्योदीपःसंपूज्यदेवताः ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान् १४ ब्रह्मावि
ष्णुमहेशानांभवनेषुविशेषतः कूटागारेषुचैत्येषुसभासुचनदीषुच १५ प्राकारोद्यानवापीषुप्रतोलीनिष्कुटेषुच
मंदुरासुविविक्तासुहस्तिशालासुचैवहि १६ एवंप्रभातसमयेत्वमावस्यायांभामिनी स्नात्वादेवान्पितॄन्भक्त्या

कार्तिक० नरोत्तमः स्नायप्रातस्त्वत्र १७ कृत्वानुपार्वतोस्नानंदद्यात् पितृतोरंघृतादिभिः भोजयेन्नानाविधैर्विप्रान् भोजयित्वा समापये
त् १८ ततोपराह्नसमये पापापेन्नानागवांस्त्रिये तैर्नागतांछिवरारोहे कृत्वा तं भाषवंतोनिपः १९ पितृदत्तां वत्सरं यावद्धि
३२ तिमृत्वा यत्र दिवि अत्र यदेहहोपूर्वं कर्मभिर्लक्ष्मीप्रवेशमापेत् २० पूर्वश्चायसमये लक्ष्मीधाम्याचयित्वा भुजान्वितैः पः पुमा
न्वावत्सरं पावन्तले लक्ष्मीस्तेनैवमुच्यते २१ अथमयैश्चाय विप्रेभ्यो विष्णुभोक्ता मुरद्विषः सुप्रतीयाद्वचोऽध्यानतल
क्ष्मीपवश्चापि ताललभूत २२ संक्रमोति श्रीरं विश्वहुविष्णु सर्वमतितारकः सर्वेषामपि तिथीनामेवमितत्थ्य वनेमा
नमः २३ पारलक्ष्मीदिवसेषु एष दीपावल्यां च यत्तस्य सर्वागमस्तु कार्तिकांकालक्ष्मी वरदामम २४ शंकरस्त्र
भवानीच क्रीडयास्त तमास्थितौ भवानां ब्रह्मचिंतालक्ष्मी नैजरूपतो मतस्थिता २५ गौर्यापिता प्रदातामुने
स्तास्थतेविसजितः अनेनापि शंकरोऽतः विगोयदिनित्यमुदुराचिता २६ अथमविजयाय स्पतन्त्र संवत्सरं अपमुद्व
त्वं जातेनिश्चीपितु जनेनविद्राघलाचेनं २७ तावन्नगरस्नाराभिः सर्वैश्चैत्रवादनैः निःकाम्यतेप्रह्लादाभिर
लक्ष्मीलग्नहोगतात् २८ गोवर्द्धनधरं धारं गोकुलत्राणकारकं विष्णुकोटिकृते छायागवांकोटिप्रदम
व २९ पालक्ष्मीलोकपालानां धेनुरूपेणसंस्थिता घृतं वहतियज्ञार्थं ममपापं व्यपोहतु ३१ अग्रतः संतुमेगावो
गावोमेसंतुपृष्ठतः गावोमेहृदयेसंतु गवांमध्येवसाम्यहं ३२ इतिगोवर्द्धनः पुरुषः संपूज्यैवनैवपीडिताः सेनाद्याः
प्रकृपाविप्राः देवाः सत्यहृष्टानराः ३३ इतरेचान्नदानेन बौधयदानेनपीडिताः बहुलतांबूलदानेन पुष्पधूपकपूरकुंकु

मेः ३४ मल्लैर्नानाविधैर्दीपैरंतःपुरविलासिनी ग्रामेहिषमर्दनैस्त्रसामंतान्पतिर्ध्वनैः ३५ पदातिध्वनसंघाश्च
ग्रैवेयैः कटकैः भूषैः स्वनामांकैश्चतान्राजा तोषयेत्स्वजनान्पृथक् ३६ प्रपार्थैतोषयेल्लोकांस्ततो मल्लान्गवांस्त
था वृषभान्माहिषांश्चैव युध्यमानान्परैः सह ३७ राज्ञानश्चाश्वारूढान पदातीन्समलंकृतान् मंचारूढः स्वयं
पश्येन्नटनर्तकचारणान् ३८ कुद्दापयेत्सपेत्रगामहिष्यादिकं ततः वृषभान्कर्षयेद्धोमातृक्लि प्रत्युक्तियान्नरान्
३९ ततोपराह्नसमये पूर्वस्यां दिशि भामिनि मार्गपालीं प्रबध्नीयाद्दुर्गस्तंभेनपादपोः ४० कुशकाशमयीं दिव्यां लं
बां बहुभिर्श्रियैः वीक्षयित्वा गजानश्वान्सायमस्यां तलेन पेत् ४१ गावो वृषान्वत्सतरान्समहिषान्संरकोत्कटान्
कृत्वा होमं द्विजेंद्रैश्च बध्नीयान्मार्गपालिकां ४२ नमस्कारं ततः कुर्यान्मंत्रेणानेन सुव्रत मार्गपालि नमस्तुभ्यं स
र्वलोकसुखप्रदे ४३ मार्गपालीतले नैव सर्वलोकः फलं श्वं मार्गपालीतले नैव पालिता वो महावृषाः ४४ राजानो रा
जपुत्राश्च ब्राह्मणाः शूद्रविशेषतः मार्गपालीं समुल्लंघ्य निरुजस्सुखोन्विताः ४५ कृत्वैतत्सर्वमेवेह रात्रौ दैत्यपतेर्ब
लेः पूजां कृत्वा प्रियं साक्षाद्भूमौ मंडलके कृते ४६ बलिमालिख्य दैत्येंद्रं वर्णकैः पंचरंगकैः सर्वाभरणसंपूर्णं विंध्या
वल्या समन्वितं ४७ कूष्मांडमयमुरजंभोल्कमधुदानवैः संवृतं संपूर्णहृष्टवदनं किरीटोत्कटकुंडलं ४८ द्विभुजं दैत्य
राजं च कारयित्वा स्वके गृहे कुटुम्बमध्ये शालायां विशालायां प्रपूजयेत् ४९ मातृभ्रातृजनैः सार्द्धं संतुष्टो बंधुभिः स
ह कमलैः कुमुदैः पुष्पैः कह्लारै रक्तकोत्पलैः ५० गंधधूपैस्तथान्नैश्च नैवेद्यैः सक्षीरगुडपायसैः मद्यमांससुरालेह्यादिभि

स्तोरप्रहारकैः ५१ मंत्रेणानेनराजेन्द्रः समंत्रीसपुरोहितः पूजांकुर्वीतिवैरथाश्चसमद्भानाधिश्चवत्सरं ५२ ।बलि
राजनमस्तुभ्यंविरोचनसुतप्रभो भविष्येंद्रसुराराते पूजेयंप्रतिगृह्यतां ५३ एवंपूजांप्रिपकृत्वारात्रौजागरणंततः
कारयेत्प्रेक्षणीयादिनर्त्तनस्वकथानकैः ५४ लोकश्चापिगृहस्यांतेसपर्य्यांशुक्लमंडलैः संस्थाप्यबलिराजानंफ
लैःपुष्पैश्चपूजयेत ५५ बलिमुद्दिश्यसर्वंवैदीयतेतत्रभामिनि यानिपुण्यानिमाहेमेयवैचप्रदर्शितं ५६ यद्यददा
प्यतेदानंस्वल्पंवायदिवाबहु तदक्षयंभवेत्सर्वंविष्णोःप्रीतिकरंशुभं ५७ रात्रौयेनक्रियंतेतत्त्वपूजांबलेमम तेषा
मश्वात्रियाचर्मीकर्मिलक्ष्मीप्रजायते ५८ विष्णुनावसुधांलब्ध्वातुष्टेनबलिजेपुनः उपकारकरंदत्तमसुराणांमहो
त्सवं ५९ ततःप्रभातेसंजाते प्रवृत्ताकौमुदीशुभा सर्वोपद्रवविद्रावी सर्वविघ्नविनाशिनी ६० रागशोकहराकाम्ये
धनपुष्टिशुभावहा कुशब्देनमहीज्ञेयामुदहर्षेततोद्वयं ६१ धातुज्ञैर्निगमैश्चैवतेनैषाकौमुदीस्मृता कौमोदंतिजना
यस्मान्नानाभावैःपरस्परं ६२ हृष्टास्तुष्टाःसुखायत्ताःसन्मानस्तेनासौकौमुदीमता कुमुदानिबलेर्यस्मान्दत्तानितेनभामि
नि ६३ अर्घ्यमापार्थिवैःपुत्रैनतेनैषाकौमुदीस्मृता एकमेवमहाराजवर्षेवर्षेचभामिनि ६४ दत्तंदानवराजस्यश्राद्ध
रोमिवमंतले यःकरोतिन्नृपोराज्येतस्यव्याधिभयंकुतः ६५ सुभिक्षंक्षेममारोग्यंप्रजायाःसंपदुत्तमा निरुजाश्चज
नाःसर्वेसर्वोपद्रववर्जिताः ६६ कौमुदीक्रियतेयस्मात्भावेनहमहीतले योयादृशेनभावेनतिष्ठत्यस्यांतुषण्मुख ६७
हर्षदैन्यादिभावेनहर्षस्तस्यप्रजायते रुदतोरोदतेवर्षंहृष्टोवर्षंप्रहर्षितं ६८ भुक्तोभोक्ताभवेद्वर्षं स्वस्थःस्वस्थोभवि

ध्याति तस्मात्प्रहृष्टैस्तु छन्नकर्तव्या वै शुभदीनरैः ६९ वैष्णवो दानवो चैव यत्तिथिः प्रोक्ता च भामिनि ७० दानोत्सवं जनित
सर्वेजनैः प्रहृष्टं कुर्वंति ये शुभमतयो वलिराजसद्मनि दानोत्सवेन सुखवृद्धिरातां कुलानां हर्षं प्रयांति सकलं प्रथमं इति वर्षं ७१
इति श्रीपद्मपुराणे उत्तरखंडे कार्तिकमाहात्म्ये कृष्णसत्यभामासंवादे द्वाविंशोऽध्यायः २२ कृष्ण उवाच सप्तैतास्तिथयो
ज्ञेयं द्वितीयायास्तु विश्रुता मासः श्रावणसंश्रिते ततः प्रावृट्काले शुभावहाः १ प्रथमा श्रावणे मासि द्वितीया भाद्रके तथा
तृतीया चाश्विने मासि तुलस्थे कार्तिके स्मृता २ कलुषा श्रावणे मासि मासि भाद्रपदे मला आश्विने प्रेतसंचारा कार्तिके
याम्यका तथा ३ सत्यावाच कस्मात्सा कलुषा प्रोक्ता कस्मात्सा निर्मला मता कस्मात्सा प्रेतसंचारा कस्माद्याम्या प्र
कीर्तिता ४ सूत उवाच इति सत्यावचः श्रुत्वा भगवान्मधुसूदनः उवाच वचनं श्लक्ष्णं प्रहसन्गरुडध्वजः ५ कृष्ण उ
वाच पुरा वृत्रवधे वृत्ते प्राप्तराज्ये वसुंधरा ब्रह्महत्यापनोदार्थं गृह्णन्मेघः प्रकीर्तितः ६ क्रोधाद्दिदेशवच्चेण ब्रह्मह
त्यानिषूदिता ब्रह्मचारिता द्वितीयोदितस्या वृक्षतोयमहीतले ७ नार्याभूतां हनेव ब्रह्महत्याविभज्य मघवा क्रमेण तस्याः पापाश्च व
र्णात्मवंशं द्वितीया चाप्यदिनद्वयं ८ नारीवृत्तेन दोषमिव ब्रह्मभूता हतस्तस्या निर्मला किरणा या स्वितार्थी कलुषा मता ९
मधुकैटभेपारस्तेपुराणमग्नानुमेदिनी अप्रसीतत्सा पवित्रास्या नगिरतोनुरजोमले १० नद्यो यत्र मलाः सर्वाः कथा हप
मपाम्मलं विष्णुर्वै निचरं तस्या तेनैषा निर्मला मता ११ देवर्षिपितृणां मध्यातोनिन्दकानां हि सौहृदाः तेषां सा वाग्दलात्म
ज्याद्दितीयातेननिर्मला १२ अन्नाद्याप्यपुराणाख्याताभ्यां पांतिपंतितिच सा ख्यकालत्वात्किकाः श्रोता तास्तेषां शख्दा प्रश्नवं १३

 सत्यवता ह्यद्वितीयायां तेनायं निर्मिला च सा गृहं जित्वा ततो वहिपद्ग्राज्यपात्रोत्तमपातयाः १६ पितृन्पितामहान्प्रेतानसंवा
प्नोति च स चरा प्रेतास्तु पितरः प्राक्कान्तं तत्र संप्राप्त वरः १५ द्वितीयायां च लोके तु तेन सा प्रेतसंचरा कार्तिके चद्वितीया
यां शुक्लपक्षे तु कामिनि १६ यमो यमुनया पूर्वं भोजितः स्वगृहे चितः द्वितीयायां महोत्सर्गे नर्कीयाश्च वतर्पिताः १७ पाप

स्याविभ्रमुक्तास्ते सकास्ते सर्वे वंधनात सुधाशिता स्त्र संतुष्टाः स्थिताः सर्वे यदृच्छया १८ तेषां महोत्सवो वृत्तो यमराष्ट्रे सु
भावहः अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता १९ तस्मान्निजगृहे विप्र न भोक्तव्यं ततो बुधैः स्नेहेन भगिनी हस्ताद्भोक्तव्यं
पुष्टि वर्द्धनं २० दानानि च प्रदेयानि भगिनीभ्यो विधानतः स्वर्णालंकारवस्त्राणि पूजासत्कारभामिनि २१ जाया यास
हभोक्तव्यं भगिन्याः हस्ततः परं सर्वेसु भगिनीहस्ताद्भोक्तव्यं बलवर्द्धनं २२ उर्ज्जे शुक्ले द्वितीयायां पूजितस्तर्पितो यमः महि
षासनमारूढो दंडमुद्गर मंत्रमुः २३ वेष्टितः किंकरैर्दुष्टैस्तस्मै यमात्मने नमः येर्भगिन्यः स्ववासिन्यो वस्त्रदानादितोषि
ताः २४ नतेषां वत्सरं यावत्कलहो नित्स्यभैयं धन्यं यशस्यमायुष्यं धर्मकामार्थसाधनं २५ व्याख्यातं सकलं पुत्र स
रहस्यं मयानघ यस्यां तिथौ यमुनया यमराजदेवं भोजितः २६ कार्तिकेय उवाच भगवन् श्रोतुमिच्छामि व्रतानां मतमं
तं विधिं मासोपवासस्य फलं चास्य यथोदितं २७ यथाविधिः नरैः कार्यो व्रतचर्या यथा भवेत् ग्रारभ्यते यथा पापं चैव समाख्या
हि यथाविधिं २८ यावत्संख्या तु कर्त्तव्यं तत्त्वं ब्रूहि पितामह व्रतमेतत्पुरस्कृत्य विस्तरेणाभिधानघ २९ ईश्वर उवाच साधु
यावर्षिके सर्वपक्षपरं तरो चतः यादृग्गतिमतां श्रेष्ठ तच्छृणुष्व ब्रवीमि ते ३० सुराणां च यथा विष्णुस्तपतां च यथा रविः

मेरुः शिखरिणां यद्वद्वैनतेयः पतत्रिणां ३१ तीर्थानां च यथा गंगा प्रजानां तु यथा द्विजः श्रेष्ठं सर्वव्रतानां तु तथा मासोप
वासकं ३२ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं सर्वमासोद्भवं वापि लभेन्मासोपवासकात् ३३ अग्निष्टोमादिभिर्य
ज्ञैर्विविधैर्भूरिदक्षिणैः न तत्फलमवाप्नोति यच्च मासोपवासकं ३४ तेन दत्तं हुतं जप्तं तपस्तप्तं विधानतः यः करोति वि
धानेन तेन मासोपपोषणं ३५ प्रविश्य वैष्णवं पद्मं तेनाभ्यर्च्य जनार्दनः मनसा कर्मणा वाचा पूजयेद्गरुडध्वजं ३६ कु
र्वीत त्रिविधाहारमुक्तिं जितेन्द्रियः ३७ नाम्नामेव तथालेपं विष्णोः कुर्यादतन्द्रितः ३७ विष्णोर्मेत्था स्तुतिर्वा
च्यामिथ्यालापविवर्जितः सर्वसत्वदयायुक्तः शांतिवृत्तिरहिंसकः ३८ उपवासनसंस्थो वा वासुदेवं प्रकीर्तयेत् स्नानालो
कनगंधादिस्वादितं परिकीर्तयेत् ३९ नाम्नास्मवर्जयेद्ग्रासं स्नासामंत्रा सर्वमावृतां गात्राभ्यंगं शिरोभ्यंगं तांबूलं सविलेप
नं ४० व्रतस्थो वर्जयेन्नित्यं यच्चान्यच्च निराकृतं नाव्रतस्थः स्पृशेत्किंचिद्विकर्मस्थान्न चालपेत् देवतायतने तिष्ठेत
न गृहे स्वप्नवर्द्धते ४३ कृत्वा मासोपवासं तु यथोक्तविधिना नरः नारी वा विधवा साध्वी वासुदेवं तु पाचेयत् ४४ अ
स्नानाधिकमेवं तु व्रतं विंशद्दिनैरिदं कृत्वा मासोपवासं तु संयतात्मा जितेन्द्रियः ४५ ततोर्चयेत्तु वै विष्णुं द्वादश्यां गरुडध्व
जं पूजयेत्पुष्पमालाभिर्गंधधूपविलेपनैः ४६ वस्त्रालंकारवाद्यैश्च गीतवाद्यस्तुतैर्नरः स्नापयेत्तु हरिं सम्यक्तीर्थचे
दनवारिभिः ४७ चंदनेन विलिंपांगं गंधपुष्पैरलंकृतं वस्त्रदानादिभिश्चैव भोजयेच्च द्विजोत्तमान् ४९ दद्याच्च दक्षि
णां तेभ्यः प्रणिपत्य क्षमापयेत् ५० एवं वित्तानुसारेण भक्तियुक्तेन शक्तितः एवं मासोपवासं तु कृत्वाभ्यर्च्य जनार्दनं ५१

भोजयित्वा द्विजान्नैव विष्णुलोके महीयते एवं मासोपवासात्तु समस्तं तत्त्रयोदशः ५२ निर्वापयेत्तत्स्तान्वै विधिनापि
नतस्तु गुरु कारयेत् सर्वं पत्रे एकादश्यामुपोषणं ५३ पूजयित्वा देवलमाचार्यान्‌ तथापरान्‌ हरिं गन्धैश्च पित्वा पर्याशत्तपात्मनि
वायगुरुस्तथा ५४ ततो भोजयेद्विप्रान्नमस्कारपुरःसरं विष्णुकुलचारित्रविस्मयजननतत्परान्‌ ५५ पूजयित्वा द्विजा
न्सर्वान्भोजयित्वा त्रयोदश तवस्तिवस्त्रेणानि भोजनाच्छादनानि च ५६ योगपत्रानि सत्राणि ग्रस्तस्त्राणि चै
वहि दद्यात्स्वर्वद्विजाय यः पूजयित्वा प्रणम्य च ५७ ततोऽनुपूजयेत्‌ काशस्तात्तस्तरणं संस्कृतं सादाादनं शुभं मयो साध्या
ध्यानमलेकृतान्‌ ५८ कारयित्वा मनेनामृत्तिकां चनीतु खर्याक्ततः न्यस्य तस्यान्तु शय्यापामचपित्वा नगादिभिः ६० ग्रा
सेनापानेहोदवंवस्त्रपुग्मकमुपानेहो पवित्राणि च पुष्याणि शय्यापात्मपकस्पयेत्‌ ६१ एवं शय्यां संकल्पप्रतिपत्याचिंता
नद्विजान्‌ प्रार्थयेच्चात्मेमादाप्यं विष्णुलोकं व्रजाम्यहं ततो व्रजनरश्रेष्ठ विष्णोः स्थानमपि प्रियं ६३ मंडपस्यापि तैर्विप्रैरिति
वा चंचमकृमुकृः मंत्रहीनं क्रियाहीनं विधिहीनं द्विजोत्तमाः सर्वं संपूर्णतां यातु भवदाक्यप्रसादतः ६४ विधिर्मासोपवास
स्य पापावत्यां कीर्तितः ६६ इति श्रीपद्मपुराणे उत्तरखंडे कृष्णसत्यभामासंवादे त्रयस्त्रिंशोऽध्यायः ३३ ईश्वर उवाच
प्रबोधन्याश्च माहात्म्यं पापघ्नं सर्वकामदं भुक्तिदं तलवंहिनाः प्रणुष्व मुनिसत्तम १ तावद्गर्जति सनानि गंगाभागीरथी दि
तौ यावन्नायाति पापघ्नी कार्त्तिके हरिबोधिनी २ तावद्गर्जति सर्वाणि ग्रासमुद्रसरांसि च यावत्प्रबोधनी विष्णोस्तिथि
र्नायाति कार्त्तिके ३ अश्वमेधसहस्राणि राजसूयशतानि च एकेनैवोपवासेन प्रबोधिन्याः फलं लभेत्‌ ४ दुर्लभं चैव यद्दुः

प्राप्यं त्रैलोक्ये सचराचरे तदपि प्राप्यते विप्र ददाति हरिबोधिनी ५ उपवासं प्रबोधिन्यां यः करोति स्वभावतः विधिवन्नर
शार्दूल यथोक्तं लभते फलं ६ ऐश्वर्यं संततिं ज्ञानं राज्यं च सुखसंपदः ददाति पापिना विप्र हेलया हरिबोधिनी ७ पूर्वजन्म
सहस्रेषु पापं यत्समुपार्जितं जागरेण प्रबोधिन्यां दह्यते तूलराशिवत् ८ अन्ये पापमेव च स्नानि जागरे सचलक्षणं प
ह्येव स्नानमात्रेण दुर्लभेन जनार्दनः ९ गीतं वाद्यं च नाट्यं च पुराणपठनं तथा धूपं च दीपं च पुष्पं गंधानुलेपनं १०
फलमर्घ्यं च श्रद्धा च दानमिंद्रियसंयमं सत्यान्वितं विनिद्रं च मुदा युक्तं क्रियान्वितं ११ साश्चर्यं चैव सोत्साहं आलस्यादि
विवर्जितं प्रादक्षिण्यादिसंयुक्तं नमस्कारपुरःसरं १२ नीराजनसमायुक्तं इति विच्छिन्नचेतसा यामे यामे महाभाग कु
र्यान्नीराजनं हरेः १३ एतैर्गुणैः समायुक्तं कुर्याज्जागरणं विभोः एकाग्रमनसा यस्तु न पुनर्जायते भुवि १४ एवं कु
र्वीत यस्तु भक्त्या वित्तशाठ्यविवर्जितः जागरं वासरे विष्णोर्लीयते परमात्मनि १५ पुष्पहस्तेन ये नित्यं कार्तिके हरिमंदि
रे प्रबोधे कोटिसहस्राणि पूजितानि न वै भवः १६ यथोक्तेन विधानेन पंचरात्रं दिनेन वै कार्तिके पाचयेत्पादं स्नानकृत्
भागीभवेन्नरः १७ नमो नारायणायेति कार्तिके यो च ये पठेत् सर्वकैर्नारकैर्दोषैः पदं गच्छत्यनामयं १८ हरे
र्नाम सहस्राख्यं नागराजस्य मोक्षणं कार्तिके तु पठेद्यस्तु पुनर्जन्म न विद्यते १९ युगकोटिसहस्राणि मन्वंतरशतानि
च कल्पेषु कार्तिके मासि जागरे वसते दिवि २० कुलेन सह चैव ये जाताः शतशोथ सहस्रशः प्राप्नुवंति पदं विष्णोस्तस्मा
त्कुर्वीत जागरं २१ कार्तिके पश्चिमे यामे स्तवगानं करोति यः श्वेतद्वीपे वसते पितृभिः सह मानवः २२ नैवेद्य

कार्तिक० दानं हरये कार्तिके दिनसंचये युगानि वसते स्वर्गे तावंति मुनिसत्तम: २३ अस्तं ये मुनिशार्दूल मालतीकमलार्चनं
अर्चयेद्देवदेवेशं स याति परमं पदं २४ कार्तिके शुक्लपक्षे च कृत्वा ह्येकादशीं नरः प्रातर्दत्वा शुभान्कुंभान्स याति पर
३६ मं पदं २५ यदेतच्छ्रेष्ठं पुण्यं व्रतानामुत्तमं व्रतं कर्तव्यं कार्तिके मासे भवता भीष्मपंचकं २६ विधानं तस्य किं कार्यं फलं
तस्य सुरोत्तम कथयस्व प्रसादेन मुनीनां च पितामह २७ ईश्वर उवाच वक्ष्यामि महापुण्यं व्रतं व्रतवतां वरः भीष्मा
त्तथ्या प्राप्य व्रतं पंचदिनात्मकं २८ सकाशाद्वासुदेवस्य तेनोक्तं भीष्मपंचकं व्रतस्यास्य गुणान्वक्तुं कः शक्तः केशवादृ
ते २९ कार्तिके शुक्लपक्षे तु स्नात्वैवमेकादशीदिने वशिष्ठभृगुगर्गाद्यैश्चीर्णं कृतयुगादिषु ३० अंबरीषेण भोगाद्यैश्चीर्णं
त्रेतायुगादिषु ब्राह्मणैर्ब्रह्मचर्येण जपहोमक्रियादिभिः ३१ क्षत्रियैश्च तथा वैश्यैः सत्यशौचपरायणैः दुःकरं स
त्यहीनानां मया कथं बालचेतसां ३२ दुःकरं भीष्ममित्याहुः शक्यं प्राकृतैर्नरैः यस्तु करोति विप्रेंद्र तेन सर्वं कृतं भवेत् ३३
व्रतं चैतन्महापुण्यं महापातकनाशनं अतो नरैः प्रयत्नेन कर्तव्यं भीष्मपंचकं ३४ कार्तिकस्यामले पक्षे स्नात्वा सम्यग्यथावि
धानतः एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकं ३५ प्रातः स्नात्वा विधानेन मध्याह्ने च सदा व्रती नद्यां निर्झरगर्ते च स
मालिप्य च गोमये ३६ तिलव्रीहियवैः सम्यक्पितॄंस्तर्पयेत्क्रमात् स्नात्वा मौनेन नरः कृत्वा धौतवासा दृढव्रतः ३७
भीष्मायोदकदानं च अर्घ्यं दद्यात्प्रयत्नतः वासुदेवोपि संपूज्यः लक्ष्म्या सह प्रभुः ३८ पंचरत्नविशेषेणाद्याद्विश्रा
प्रयत्नतः एवं भीष्मस्य कर्तव्यं दानं दद्याच्छ्रोत्रिये द्विजः ३९ पंचके प्रत्यपि लाभे तु कार्तिजेन्मनितस्यति यत्किंचित्क्रियते सर्वं य

बुध्या(?)सम्यक् स्नापयेत् ४० संवत्सरव्रतानां तु लभेत्सकलं फलं कृत्वा तु उदकदानं तु यथार्पि स्वचदापनं ४१ मंत्रेणानेन यः कुर्यात्सो
त्तिभागी भवेन्नरः वैयाघ्रपद्यगोत्राय सांस्कृतप्रवराय च ४२ अनपत्याय भीष्माय उदकं भीष्मवर्मिणे वसूनामवताराय शंत
नोरात्मजाय च ४३ अर्घं ददाति भीष्माय आजन्मब्रह्मचारिणे अनेन विधिना यस्तु पंचकं तु समापयेत् ४४ अश्वमेध
सहस्रस्य प्राप्नोत्यत्र न संशयः पंचाहमपि कर्तव्यं नियमं तु प्रयत्नतः ४५ नियमेन विना यत्र न मासं वरवर्णिनि उत्तराणि
नोपि भीष्माय प्रदेयो हरिः ४६ उत्तरायणमाहीनोपि विना लग्नं भवेच्छुभः ततः संपूजयेद्विष्णुं सर्वपापहरो हरिं ४७ अ
नंतरं प्रयत्नेन कर्तव्यं भीष्मपंचकं स्नापयेत् जलेनैव पंचामृतक्षीरघृतेन च ४८ ततो वै पंचगव्येन गंधचंदनवारिणा चंदनेन
सुगंधेन कुंकुमेनाथ केशवं ४९ कर्पूरोशीरमिश्रेण लेपयेद् गरुडध्वजं अर्चयेत्पुष्परैः पुष्पैर्धूपधूपसमन्वितैः ५०
गुग्गुलं घृतसंयुक्तं दद्यात्कृष्णाय भक्तिमान् दीपकं तु दिवारात्रौ दद्यात्पंचदिनानि तु ५१ नैवेद्यं देवदेवस्य परमान्नं निवेद
येत् एवमभ्यर्च्य देवेशं संस्मृत्वा च प्रणम्य च ५२ नमो भगवते वासुदेवायेति जपेदष्टोत्तरं शतं जुहुयाच्च यथाशक्त्या तिल
व्रीहियवादिभिः ५३ षडक्षरेण मंत्रेण स्वाहाकारान्वितेन च उवासपश्चिमा(?) संरक्षाप्रणाम्य गच्छेद्गरुडध्वजं ५४ जपित्वा पूर्ववि
मंत्रेविदित्विधा(?)भवेन्नरः सर्वमेतद्विधानेन कार्यं पंचदिनानि तु ५५ विशेषतश्च व्रतेह्यस्मिन्नपदं भजन्पं(?) प्रणेष्वतत(?) प्रथमेह्नि
हरेः पादौ पूजयेत्कमलैर्व्रती ५६ द्वितीये बिल्वपत्रेण जानुदेशं तु तृतीयके अप्राना भिंगानु(?) ततः पत्रैः स्तुलस्याः पूजयेद्धरेः ५७ बाण
बिल्वपत्रैस्तु तत्स्कंधौ वैष्णवे पूजयेत् ततो न पञ्चमेह्नि शिरो मालत्या चक्रपाणिनः ५८ कार्तिक्यां देवदेवेश मत्स्यातद्गतमा

कार्तिकमा० नसः अच्चवितस्य घोकेशरं एकादश्यां समास्ततः ५९ त्रिपास्य गोमयं सम्यग् एकादश्यामुपासिते गोमूत्रं मंत्रवद्वै मो द्वादश्यां
प्राशयेद्व्रती ५९ क्षीरं चैव त्रयोदश्यां चतुर्दश्यां दधि तथा दधि संप्राश्य पञ्चगव्यं उपोष्य लंघयेत्तु चतुर्दिनं ६० मिचेमं दिवसं
३७ स्नात्वा विधिवत्पूज्य केशवं भोजयेद्ब्राह्मणान्भक्त्या दद्यात्तेभ्यश्च दक्षिणां ६१ पापबुद्धिं परित्यज्य ब्रह्मचर्येण धीमता मद्य
मांसं परित्यज्य मैथुनं पापकारणं ६२ शाकाहारोऽसंयुक्तः कस्माच्चैन परान्नित्यं ततो नक्तं स्वल्पहारो यात्यं चेगवा ९१:मरं ६३
एवं सम्यक्कृते मासस्यापायपपोक्तं व्रतमाप्नुयात् मध्यमधमस्तु पन्मयं जन्मनामरणांतकं ६४ एतद्भीष्म व्रतं कृत्वा प्राप्नोति परमं
पदं स्त्रीभिर्वा भर्तृवाक्येन कर्तव्यं कर्मवर्द्धनं ६५ विधवाभिश्च कर्तव्यं मासो दोषाक्षोभिवृद्धये सर्वकामसमृद्ध्यर्थं पुण्यार्थं
मपि पावकि ६६ नित्यस्नानेन दानेन कार्तिकमुपासते वैष्णवैर्वैष्णवैश्च कर्तव्यं नित्यं ध्यानपरायणैः ६७ आरोग्यपुत्रदाव
सं महापातकनाशनः तीर्थेषु कार्तिकीं कुर्यात्सर्वयत्नेन भामिनि ६८ संवत्सरव्रतानां तु समाप्तिः कार्तिके मता पापस्य प्रति
माकार्या रौद्रवक्त्रातिभीषणा ६९ खड्गहस्ता विनिःक्रांता लोहदंष्ट्रा करालिनी तिलप्रस्थोपरि स्थाप्य कृष्णवस्त्राभिवेष्टि
ता ७० रक्तपुष्पकृतापीडा वलकांचनकुंडला संपूज्य परया भक्त्या धर्मराजस्य नामभिः ७१ इदमुच्चारयेन्मंत्रं गृहीत
तकुसुमांजलिः यन्मया जन्मनि कृतं मिहं जन्मनि वाधनः ७२ पापं प्रशममायातु तव पादप्रसादतः एवं संपूज्य विधिवत्प्रति
मां तां वर्णकांचनि ७३ कृत्वा पूजां यथाशक्त्या विप्रायतां वेदवादिने प्रीतये देवदेवस्य कृष्णस्याक्लिष्टकर्मणः ७४ ब्राह्म
णाय प्रदातव्या मम धर्मो मे प्रीयतामिति ७५ सूतउवाच इमां कथां यः शृणुयान्नरोत्तमो यः श्रावयेद्वापि विशुद्धचेताः सती

कार्तिकमा० पीसमं वदीवनं पद गत्वा फलं तत्समवाप्नुयात् ७६ ऐणापहं पातकनाशनं तत्परं सद्बुद्धिदं पुत्रधनादिसाध्यं मुक्तेर्नि
दानं नोहि कार्तिकव्रतात् विष्णुप्रियाद्न्यदिहास्ति भूतले ७७ विष्णुप्रियं सकलकल्मषनाशनं च सत्पुत्रपौत्रधनधान्य
३८ समृद्धिकारि ऊर्जे व्रते सुनियमं कुरुते मनुष्यः किं तस्य तीर्थपरिशीलनेन सेवयाच ७८ इति श्रीपद्मपुराणे उत्तरखंडे
कार्तिकमाहात्म्ये पंचपंचाशत्साहस्र्यां संहितायां कृष्णसत्यभामासंवादे चतुस्त्रिंशोऽध्यायः ३४ इति श्रीपद्मपुराणे उ
त्तरखंडे कृष्णसत्यभामासंवादे कार्तिकमाहात्म्यं संपूर्णं लिखितमिदं चुलकाराम्स्थितपुगलालेन संवत् १८९० मासेमार्ग
शीर्षे कृष्णपक्षे तिथौ २ बुधवासरान्वितायाम् शुभं भूयात् श्रीमच्चुल्लकंदर्पग्रामस्यास्मत्कुस्थानेभ्यो नमः ॥